
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्री काशी विश्वनाथपुरी महल्लादीनानाथ के गोला के उत्तर फाटक के पास बाबुलालसाहु के
मकान मे सूर्य्यप्रभाकर छापाखाने मे हजारीलाल के इहा आचाराऽदर्शः छापी गई छाप
ने वाला गोपाल लिखा कामतापसाद कायस्थ जिस को लेना होय तो नईसडक के पास बा
बुकवलेसरसिंह के दुकान पर मिलैगी ॥ संबत् ॥ १९३९ ॥ श्रावण सुक्ल १४ ॥ ७ ॥

आ·
द·
१

ॐ॥ श्रीगणेशायनमः॥ दीक्षितोरणयज्ञेषु विबुधानंददायिषु॥ हरिरब्धिसुतावक्त्रसोमपीतीपुनातुवः॥१॥ अहोरात्राश्रितोधर्म्मइ
हवाजसनेयिनाम्॥ निबध्यतेनिबद्धोयोधर्म्मःशास्त्रनिबन्धिभिः॥ तत्रमनुः॥ ब्राह्मेमुहूर्त्तेबुध्येतधर्म्मार्थौचानुचिन्तयेत्॥ कायक्लेशां
श्चतन्मूलान्वेदतत्वार्थमेवच॥ ब्राह्मोमुहूर्त्तःसंध्यापूर्वदंड वयात्मकः तन्मूलान् धर्म्मार्थहेतुक्रियानिमित्तकान् वेदतत्वार्थमि
तितत्वपदमपन्यायप्रतीतार्थनिवारणार्थम् वेदतत्वार्थोब्रह्मेत्येके॥ ब्रह्मपुराणे॥ ब्राह्मेमुहूर्त्तेसुस्थेचमानसेमतिमान्नृपः॥ विबुद्ध
श्चिंतयेद्धर्म्ममर्थंचास्याविरोधिनम्॥ अपीडयातयोःकाममुभयोरपिचिंतयेत्॥ अथमूत्रपुरीषोत्सर्गविधिः॥ तत्रविष्णुपुराणे॥ ततः
कल्यंसमुत्थायकुर्यान्मैत्रंनरेश्वरः॥ नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः॥ मैत्रंपुरीषोत्सर्गः॥ मित्रदेवताकंपायुसंबंधात्॥ नैर्ऋ
त्यांशयनस्थानात्॥ आपस्तंबः॥ मूत्रपुरीषेकुर्याद्दक्षिणांदिशं दक्षिणांपरांवा गत्वेतिशेषः॥ दक्षिणापरानैर्ऋती॥ तथास्तमिते
चवहिर्ग्रामादाराच्चावसथान्मूत्रपुरीषयोःकर्मवर्जयेत्॥ आराद्दूरे॥ आवसथाद्गृहात्॥ वायुपुराणे॥ शुष्कैस्तृणैस्तथाकाष्ठैःपत्रैर्वेणु
दलेनवा॥ मृन्मयैर्भाजनैर्वापिअंतर्द्धायवसुंधराम्॥ तृणैःकुशादिव्यतिरिक्तैः काष्ठैःपालाशादिव्यतिरिक्तैःतृणमयाज्ञिकंकाष्ठमित्या
पस्तंम्बवचनात्॥ मनुः॥ मूत्रोच्चारसमुत्सर्गंदिवाकुर्यादुदङ्मुखः॥ दक्षिणाभिमुखोरात्रौसंध्ययोश्चयथादिवा॥ एवंचमनुनासर्वका
लव्यापिमुखनियमविधानात्प्रत्यङ्मुखस्तुपूर्वाण्हेसायान्हेप्राङ्मुखस्तथा॥ उदङ्मुखस्तुमध्यान्हेनिशायांदक्षिणामुख॥ इतियमव
चनम्॥ सदैवोदङ्मुखःप्रातःसायान्हेदक्षिणामुखः इतिदेवलवचनंचनादर्तव्यम्॥ मन्वर्थविपरीतायास्मृतिःसानप्रशस्यते इति
वृहस्पतिवचनात्॥ अथवामानवंदिवापरंप्रातर्मध्यान्हपरमितिनविरोधः॥ पुनर्मनुः॥ छायायामंधकारेवारात्रावहनिवाद्वि

१

जः॥ यथासुखमुखः कुर्यात्प्राणबाधाभवेषु च॥ रात्रावहविवेत्युक्तेः संध्यायामुदङ्मुखत्वनियमएव अत्रसंख्यायनगृह्यम्॥ य
द्येकवस्त्रोयज्ञोपवीतंकरोदित्वाद्विवस्त्रतापक्षेतुनियम्यते यतोवाचंसंवीतंसंवीतंनिवीतं अंसयोर्हृद्योर्मध्येयस्य आच्छादित
शिरःनांसोऽवगुण्ठितइतिमनुवचनान्निवीतमेवकर्त्तव्यम् तच्चपृष्ठलंवितम् निवीतमापृष्ठदेशावलंबनं याम्यधर्म्मेषितिनिग
मपरिशिष्टेदर्शनात् याम्यधर्म्मोमैथुनम् काण्डाराइतिवत् बहुवचनमाद्यर्थेतेनमूत्रपुरीषोत्सर्गपरिग्रहः तत्रहारीतः॥ घ्राणा
स्यंवाससावेष्टयित्वामृद्धात्रींकण्ठेसमासज्यदक्षिणबाहुपार्श्वेकमण्डलुमादाय मृद्धात्रींमृत्तिकापात्रीं यमः॥ शिरःप्रच्छाद्य
कुर्वीतशकृन्मूत्रविसर्जनम्॥ मनुः॥ नमूत्रंपथिकुर्वीतनभस्मनिनगोव्रजे नफालकृष्टेनजलेनचित्यांनचपर्वते॥ नजीर्णदेवा
यतनेनवल्मीकेकदाचन॥ नससत्त्वेषुगर्तेषु मूत्रमितिपुरीषस्याप्युपलक्षणं॥ चितिरग्निचयस्थानंचितावा॥ नजीर्णदेवा
यतनइतिदृष्टार्थं काष्ठेष्टकादिपातसंभवात्॥ यमस्मृतौचसर्वदेवायतनइतिनिषेधोवक्ष्यते॥ ससत्त्वेषुप्राणिमत्सु। तथा॥ न
नदीतीरमासाद्यनचपर्वतमस्तके॥ पर्वतनिषेधादेवपर्वतमस्तकनिषेधसिद्धेपुनस्तन्निषेधोयत्रापिपर्वतोऽशक्यपरिहारस्त
त्रापिमस्तकवर्जनार्थः॥ देवलः॥ पापीकूपनदीगोष्ठचित्यंभःपथिभस्मसु अग्नौकाम्येश्मशानेचविण्मूत्रंनसमाचरेत्॥ वा
प्यादिपदंजलरहितभागनिषेधार्थमंभसः पृथगुपादानात्॥ काम्येप्रकृष्टस्थाने अत्रचविष्णुः नोषरेनशाड्वलेनपराङ्मुखोनो
द्यानोदकसमीपयोर्नाकाशे॥ आकाशेऽसंवृतदेशेतदुक्तंवायुपुराणे॥ यदाकाशःस्मृतोभीमस्तस्मान्नासंवृतेक्वचित्॥ कुर्यान्मूत्रं
पुरीषंवानभुंजीतपिवेन्नवेति॥ एवंचाकाशेअट्टालिकादिस्थितइतिव्याख्यानमस्पृष्टम्॥ अत्रयमः॥ पल्वलानितडागानिनदी

आ·
द·
२

प्रस्रवणानिच॥नगगोमयभस्मानिफालकृष्टानिवर्जयेत्॥तुषाङ्गारकपालानिदेवतायतनानिच॥राजमार्गश्मशानानिक्षेत्राणिच
खलानिच॥उपरुद्धोनसेवेतछायांदृश्यंचतुःपथं॥उदकंचोदकांतंचपन्थानंचविवर्जयेत्॥वर्जयेद्वृक्षमूलानिचैत्यश्वभ्रवि
लानिच॥उपरुद्धोवेगी॥पंथानमित्यनेनैवनिषेधेसिद्धेराजमार्गचतुःपथयोरुपादानंदंडधारणारूपदृष्टप्रयोजनकं॥हलायु
धनिबंधेतुसमीपलक्षणोक्ताचैत्योग्रामादिप्रसिद्धिहेतुर्महावृक्षः॥श्वभ्रंविदीर्णभूभागः॥हारीतः नचत्वरोपहारयोर्मूत्रपुरीषेकुर्यात्
नतीर्थेनसमासंपन्नेनयज्ञियानांवृक्षाणामधस्तात्॥चत्वरंनानाजनावस्थानदेशः काकादिबलिस्थानमितिकेचित् उपहारंहारस
मीपंतीर्थेप्रपायदेशेजलावतरणमार्गइत्येके॥आपस्तम्बः॥छायायांमूत्रपुरीषयोःकर्म्मवर्जयेत्स्वान्त्ववमेहेत॥छायायांपथिका
द्युपजीव्यछायायांनोपजीव्यछायायामितिस्मृत्यंतरात्॥स्वान्त्ववमेहेदिति अनुज्ञाबलाच्चपुरुषान्तरछायापिनिषिद्धा॥तथानसो
पानत्कोमूत्रपुरीषेकुर्यात्॥अत्रमनुः॥नगछन्वापिचस्थितइति॥स्थितऊर्द्धः॥शंखलिखितौ॥नानंतर्वासाःकुर्यात्मूत्रपुरी
षइतिशेषः॥गौतमः॥नवाय्वग्निविप्रादित्यापोदेवतागाश्चपश्यन् मूत्रपुरीषाऽमेध्यान्युदस्येत्॥देवताविष्णवादिप्रतिमा॥अमे
ध्यानिश्लेष्मादीनि॥अत्रयाज्ञवल्क्यः॥नप्रत्यक्ग्निगोसोमसंध्याम्बुस्त्रीद्विजन्मनाइति॥अत्रसंख्यायनगृह्यम्॥नादित्याभिमुखोनजं
घन्येनिंद्यस्थाने॥हंतिमेहयतःप्रज्ञांप्रतिपंथानमेवच॥विष्णुपुराणे॥तिष्ठेन्नातिचिरंतत्र॥तत्रमूत्रपुरीषस्थाने॥हारीतः॥लोष्ठेनप्रमृ
जीतशुष्ककाष्ठेनवाप्रमृजीतगुदलिंगेइतिशेषः॥लोष्ठेनेतिशुष्ककाष्ठाऽभावेनपर्णालोष्ठाश्मभिर्मूत्रपुरीषापकर्षणंकुर्यादिति गौतमनि
षेधात्॥व्यासः॥नाश्ममूलफलांगारैरुन्मृज्येन्नास्थिवर्हिषा॥आपस्तम्बः॥आर्द्रान्नोषधिवनस्पतीनाछिद्यमूत्रपुरीषयोःस्रंसनकर्मव

र्जयेत् अथ शौचं मनुः गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ अतंद्रित अनलसः॥ एत
च्चकृष्यन्तरविहितसंख्यानुवादार्थं अतो गंधलेपक्षयादेव शौचं संख्यादिनियमस्त्वदृष्टार्थ इति व्याख्यानमशुद्धम् शुद्धिमभीप्सि
तेति श्रवणाच्च ब्रह्मपुराणे उद्धृतोदकमादाय मृत्तिकां चैव वाग्यतः उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः मृत्तिकाग्रहणं कराग्र
सक्तमृद्धात्रीतः हारीतानुसारात् तदसंभवेऽन्यतोपि कुर्यात् शौचमिति विशेषः यमः आहरेन्मृत्तिकां विप्रः लात्ससिकतां तथा ना
खूत्कृष्टान्नवल्मीकात्पांसुलान्नचकर्दमात् नमार्गान्नोखरान्नैव शौचशिष्टापरस्य या विप्र इति शौचकर्तृमात्रोपलक्षणं कूलादिति
च शुद्धदेशोपलक्षणम् विष्णुपुराणे वल्मीकमूषकोत्खातां मृदमन्तर्जलां तथा शौचावशिष्टां गेहाच्च नादद्याल्लेपसंभवाम् अन्तः प्रा
ण्यवपन्नां च हलोत्खातां च पार्थिव परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने अन्तः प्राण्यवपन्नां संकीर्णां अथ ब्रह्मपुराणे सुनिर्णि
क्ते मृदं दद्यान्मृदं तेत्ता पएव हि सुनिर्णिक्ते केवलजलप्रक्षालिते तथा च गौतमः गंधलेपापकर्षणे शौचममेध्यस्य तदद्भिः पूर्वं मृदा
चेति एवं च सुनिर्णिक्तपदं काष्ठादिप्रोञ्छितगुदानुवादकमित्ययुक्तं व्यर्थत्वाच्च अत एव सुनिर्णिक्ते सुप्रक्षालिते पाद्यादाविति कल्प
तरुव्याख्यातं मनुः एका लिंगे गुदे तिस्रस्तथैवैककरे दश उभयोः सप्तदातव्याः मृदः शुद्धिमभीप्सिता एककरे वामे शंखः मृत्तिका
तु समादिष्टा त्रिपर्वा पूर्यते यया अयं च परिणामविधिर्गुरुं विहाय बोधव्य अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता द्वितीया च तृती
या च तदर्द्धा परिकीर्तितेति दक्षेण गुदे परिमाणान्तरविधानात् अत्र च लिंगे मृत्तिकाद्वयं गुदे पंच सप्त वामकरे चतुर्दश विंशतिर्द्वा
त्रिंशद्वा हस्तद्वये चतुर्दश षोडश वा मृत्तिका स्मृत्यंतरे विहितास्ताश्चलेपानुवृत्तिशंकायां बोद्धव्याः अन्यथा मानवः कल्पएव बहु

भिः संवादान्मानवपक्षेपि वामकर एष्वेव षण्मृत्तिका देयाः षट् एष्वतः इति हारीतवचनात् अत्र यमः तिस्रस्तु मृत्तिका देयाः कृत्वा तु नख
शोधनं हस्तयोरिति विशेषः एवं च पुनः सप्त मृत्तिका इति ब्रह्मपुराणोयं लेपशंकायां पुनर्यमः तिस्रस्तु पादयोर्देयाः शुद्धिकामस्य नित्य
शः तिस्र इति प्रतिपादं एतच्चात्यंतशंकायामन्यथा तु प्रतिपादमेकैका पादयोर्द्वे इति ब्रह्मपुराणात् मनुः एतच्छौचं गृहस्था
नां द्विगुणं ब्रह्मचारिणां त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणं इदं तु द्विगुण्यादि संख्यामात्रे तदंतरमेवाभिधानात् न्यूनाधिकं
न कर्तव्यं शौचं शुद्धिमभीप्सतेति दक्षोक्तसंख्यापरिमाणोभयपरं विशेषाभावात् एवं च यावत्साध्विति मन्येतत्तावच्छौचं वि
धीयते प्रमाणं द्रव्यसंख्यावानशिष्टैरुपदिश्यते इति देवलवचनं चातुराश्रम्यादन्यत्र तत्र संख्यादेरश्रवणात् उदकविषयं वा॥
दातव्यमुदकं तावद्यावत्स्यान्मृत्तिकाक्षय इति दक्षेणोक्तत्वात् आपस्तंबः अन्हि शौचं यथा प्रोक्तं निश्यर्द्धं तु तदिष्यते पथि पादस्तु
विज्ञेया आर्तः कुर्याद्यथाबलं ऋष्यशृंगः यस्मिन्स्थाने कृतं शौचं वारिणा तच्च शोधयेत् नशुद्धिस्तु भवेत्तस्य मृत्तिकां योन शोधये
त् मूत्रमात्रोत्सर्गे दक्षः एका लिंगे तु सव्ये त्रिरुभयोर्मृद्द्वयं स्मृतं बौधायनः मूत्रवद्रेतसः समुत्सर्गे देवलः धर्मविद्दक्षिणं हस्तम
धः शौचं योजयेत् तथैव वामहस्तेन नाभेरूर्द्धं न शोधयेत् मक्तिरिति रेषास्यात्कारणाद्भयक्रिया कारणाद्रोगादेः उभयक्रियाद
क्षिणहस्तेनाधः कायशोधनं वा वामहस्तेन उर्द्धकायशोधनं शौचानंतरं हारीतः गोमयेन मृदा वा कमंडलुं परिमृज्य पूर्ववदुपस्पृ
श्यादित्यं सोममग्निं वा वीक्षेत अत्र दिवा आदित्यं रात्रौ सोमम् उभयोरभावेग्निमिति वोद्धव्यं ब्रह्मपुराणे पादयोर्द्वे गृहीत्वा च सुप्रक्षालि
तपाणिना त्रिराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनं अत्र शंखलिखितौ आचम्येशानं मनसा ध्यायेत् व्यासः शौचं कृत्वा मूत्रोच्चा

रंनपश्येत् दृष्ट्वादित्यमग्निंसोमंवापश्येत् अत्रवसिष्ठेनगोब्राह्मणदर्शनमधिकमुक्तं अथाचमनविधिः तत्रदेवलः प्रथमंप्राङ्मुखंः
स्थित्वापादौप्रक्षालयेच्छनैः उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः शिखांबद्ध्वावसित्वंचद्वेनिर्णिक्तेवाससीशुभे एवंएतद्
र्शनात्प्रत्यक्प्रागवसेचनित्यापस्तंबीयं पश्चिमाभिमुखत्वंकेवलपादप्रक्षालनविषयं तथा इत्येवमद्भिराजानुप्रक्षाल्यचरणौ
पृथक् हस्तौचामणिबंधाभ्यांपश्चादासीसतंयतः अथापःप्रथमातीर्थाद्दक्षिणात्त्रिःपिबेत्समं अशब्दमनवस्त्रावमवहिर्जा
नुबुद्बुदं आजान्विति अध्वभ्रमणादिनातत्पर्यंतमशौचे आजंघाभ्यांपादाविति हारीतोक्तेः अत्रभविष्यपुराणे समौतुचर
णौकृत्वातथाबद्धशिखोनृपः तथा घनांगुलिकरंकृत्वाएकाग्रःसुमनाद्विजः नृसिंहपुराणे दक्षिणंतुकरंकृत्वागोकर्णाकृति
वत्पुनः त्रिःपिबेद्वीक्षितंतोयमास्यंद्विःपरिमार्जयेत् मनुः ब्राह्मेणविप्रतीर्थेननित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यांवानपि
त्र्येणकदाचन विप्रइतिआचमनकर्तृमात्रोपलक्षणम् आचमनोद्देशेनतीर्थविधानात् कायंप्राजापत्यं त्रैदर्शिकंदैवं अ
त्रसंभवेब्राह्मतीर्थेनैवाचमनंनित्यकालमितिश्रवणात् ब्राह्मणादिनाब्राह्मतीर्थावरोधेकायत्रैदशिकाभ्यामितिव्यवस्थितो
विकल्पः पित्र्यंतुसदानिषिद्धंनपित्र्येणकदाचनेत्यभिधानात् याज्ञवल्क्यः कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच प्र
जापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् देशिनीतर्जनी हारीतः अंतर्जानूर्वोहस्तौकृत्वात्रिरपोशब्दंपिबेत् याज्ञवल्क्यः अद्भि
स्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः हृत्कंठतालुगाभिश्चयथासंख्यंद्विजातयः शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरन्
तः अन्नत औष्ठ्यांततः आपस्तंबः भूमिगतास्वप्स्वाचाम्यप्रयतोभवती यद्वाप्रयतआचामेत् भूमिगतास्वितिउद्धरणस्या

आ॰
द॰
४

नमपेक्षितं उद्धृत्यपरिस्रुताभिरद्भिरितिशंखवचनात् गौतमः शुचौदेशेआसीनोदक्षिणंबाहुंजान्वंतरंकृत्वायज्ञोपवीत्याम
णिबंधात्पाणीप्रक्षाल्यवाग्यतोहृदयस्पृशस्त्रिश्चतुर्वाअपआचामेत् पादौचाभ्युक्षेत्खानिचोपस्पृशेत् शीर्षण्यानिचमूर्द्धनि
दद्यात् हृदयस्पृशइति ब्राह्मणपक्षेचतुर्वेति त्रिराचमनोऽपरितोषपक्षेएवंचतुर्वेतिफलभूमार्थमितिव्याख्यानमशुद्धं कल्पना
प्रसंगात् खानिइंद्रियाणि उपस्पृशेदपइत्यन्वीयते तदुक्तंगोभिलगृह्येइंद्रियाण्यद्भिःसंस्पृशेत् आक्षिणीनासिकेकर्णा
विति मनुरप्याह खानिचैवंस्पृशेदद्भिरिति दक्षः प्रक्षाल्यहस्तौपादौचत्रिःपिबेदम्बुवीक्षितं संवृत्यांगुष्ठमूलेनद्विःप्रमृज्य
ततोमुखं संहत्यत्रिस्त्रिभिःपूर्वमास्यमेवमुपस्पृशेत् अंगुष्ठेनप्रदेशिन्या घ्राणंपश्चादनंतरे अंगुष्ठानामिकाभ्यांचचक्षुःश्रो
त्रेपुनःपुनः कनिष्ठांगुष्ठयोर्नाभिंहृदयंतुतलेनवै सर्वाभिस्तुशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेत् तिसृभिस्तर्जनीमध्यमानामि
काभिः अत्रघ्राणस्यचक्षुषः श्रोत्रस्यचस्पर्शनंपुटद्वयेतदभिप्रायेणपुनःपुनरिति बाहुस्पर्शनंचांऽसदेशे तथाचशंखः तर्ज
न्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयं अंगुष्ठमध्यमायोगेस्पृशेन्नेत्रद्वयंततः अंगुष्ठानामिकायाश्चयोगेनश्रवणेस्पृशेत् कनिष्ठांगु
ष्ठयोगेनस्पृशेत्स्कंधद्वयंततः इंद्रियस्पर्शनानंतरं भविष्यपुराणे यद्भूमावुदकंवीरसमुत्सृजतिमानवः वासुकीप्रमुखान्नागांस्ते
नप्रीणातिभारत॥ देवलः सोपानत्कोजलस्थोवामुक्तकेशोपिवाद्विजः उष्णीषीवापिनाचामेत् वस्त्रेणावेष्ट्यवाशिरः नगच्छ
न्नशयानश्चनचलन्नपरान्स्पृशन् नहसन्नैवसंजल्पन्नात्मानंचैववीक्षयन् केशान्नीवीमधःकायमस्पृशन्धरणीमपि यदिस्पृश
तिचैतानिभूयःप्रक्षालयेत्करं आत्मानंहृदयंवीक्षयन्निति स्वार्थेणिच् अधःकायोनाभ्यपेक्षया व्यासः शिरःप्रावृत्यकंठंवामु

क्षकस्त शिखोपिवा अकृत्वा पादयोः शौचमाचांतोप्यशुचिर्भवेत् अत्र ब्रह्मपुराणे कंठं शिरो वा प्रावृत्य रथ्यापणगतोपि वा आ
पलः क्रयविक्रयभूमिः प्रचेताः नानंतर्वासाः न शब्दं कुर्वन्न चामेध्ये अनंतर्वासाः अनन्तर्वस्त्रशून्यं अत्र गोभिलः नांतरीयैकदे
शेन कल्पयित्योत्तरीयकं बौधायनः दानमाचमनं होमं भोजनं देवतार्चनं प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं आसनारूढपाद
स्तु जानुनोर्जंघयोस्तथा कृतावसिक्थिकोपस्थ्यं पौढपादः स उच्यते मरीचिः न बहिर्जानु नत्वरयानासनस्थो न चोत्थितः न पादुका
स्थो नान्यचित्तः शुचिः प्रयतमानसः तथा भुक्तासनस्थोप्याचामेन्नान्यकाले कदाचन गोभिलः जानुभ्यामूर्द्ध्वमाचम्य जले तिष्ठन्न
दुष्यति पैठीनसिः अंतरुदकमाचांतोन्तरेव शुध्यति वहिरुदकमाचांतो वहिरेव शुद्धो भवति तस्मादन्तरेकं पादं कृत्वाचामेत्स
र्वत्र शुद्धो भवति व्यासः अपः पाणिनखाग्रेण आचामेद्यस्तु वै द्विजः सुराणेन तत्तुल्यमित्येवमृषिणाब्रवीत् बौधायनः पादप्रक्षा
लनेनोच्छिष्टेन च नाचामेत् यद्याचामेत्किंचित्तु भूमौ स्रावयित्वाचामेत् आपस्तंब नाग्न्युदकशेषेण तथा कर्माणि कुर्वीत आचा
मेत् ह्वा पाणिना संसृष्टेनैकैकपाण्याऽवर्जितेन नाचामेत् तथा न वर्षधारस्वाचामेत् न प्रदरोदकेन न तप्ताभिश्चाकारणात् प्रदरो वि
दीर्णभूभागः आकारणात् रोगादिव्यतिरिक्तेन अतएव वसिष्ठः प्रदरादपि योग्यास्तु गोतर्पणाय स्युः न वर्णरसदुष्टाभिर्याश्च स्युरशुभा
गमाः अत्र शंखलिखितौ न शूद्राशुच्येकपाण्यावर्जिताभिः अत्राशुचिना एकपाणिना परेणावर्जितं जलं निषिद्धं शूद्रसाहचर्यात्।
मूत्रपुरीषे कुर्वन् दक्षिणहस्ते गृह्णाति सव्य आचमनीयमिति बौधायनेन वामकरे कमण्डलुधारणविधानाच्चेति प्रपंचितं छंदोगान्हि
के अथाचमननिमित्तानि तत्र पैठीनसिः उच्छिष्टे रेतो विण्मूत्रं संस्पृश्योन्मृज्याचम्य प्रयतो भवति त्रिः प्रक्षाल्य च तं देशं आचमनप्र

आ॰
द॰
५

क्षालनयोरर्थक्रमेण पाठक्रमबाधः ॥ मनुः वसाशुक्रमसृङ्मज्जामूत्रं विड्घ्राणकर्णविण्णखाः श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥ बौधायनः आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये उत्तरेषु च षट्स्वद्भिः केवलाभिर्विशुध्यति अत्र प्रक्षालनानंतरमाचमनं तथा च देवलः उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि तथाविधं तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुध्यति यदंभः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति प्रक्षाल्याशुचिलिप्तं च संस्पृश्याचम्य शुध्यति यदंभ इत्यादि शौचे इत्यादिजलार्द्रितभूभागं संस्पृश्याशुचिभूमाङ्गं प्रक्षाल्याचम्य शुध्यतीत्यर्थः बौधायनः नीवीं विस्रस्य परिधायोपस्पृशेत् आपस्तम्बः स्वप्ने क्षुवथौ सिंहाणिकायाश्रुणाश्चालंभे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालंभे महापथं गत्वाऽमेध्यं चोपस्पृष्ट्वाऽप्रयतं च मनुष्यं नीवीं परिधायोपस्पृशेत् क्षुवथौ लिष्टांसिंहाणिकायाश्रुणाश्चस्पर्शे तथा रिक्तपाणिर्वयस उद्यमो पस्पृशेत् शक्तिविषयेन मुहूर्तमप्यप्रयतः स्यात् रिक्तपाणिः शून्यपाणिर्वयसे पक्षिणः उद्यम्य पाणिमिति शेषः विष्णुः पंचनखास्थि निःस्नेहं स्पृष्ट्वाचामेत् चांडालम्लेच्छसंभाषणे च हारीतः स्त्रीशूद्रोच्छिष्टाभिर्भाषणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगंतुकाम आचामेत् तथा रथ्यामाक्रम्य सुप्त्वा तथा जलानुवृत्तो नोत्तरेदनुस्पृश्यः यम्रः उत्तीर्योदकमाचम्यावतीर्योपस्पृशेत् ततः एवं श्रेयसा युक्तो वरुणेनैव पूजितः मन्वङ्गिरोबृहस्पतयः सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतं वचः पीत्वा त्वाध्येष्यमाणश्चाचामेत्प्रयतोपि सन् संवर्तः चर्मारं रजकं वेणुं धीवरं नरमेव च एतान्स्पृष्ट्वा नरो मोहादाचामेत्प्रयतोपि सन् ब्रह्मपुराणे अधमवर्णस्य लंलापे सुप्ते वादंतधावने आचम्य प्रयतो भूत्वा ततः शुद्धो भवेन्नरः अधमवर्णश्चाण्डालादिः वायुपुराणे निष्ठीवने तथाभ्यंगे तथा पादावसेचने उच्छिष्टस्य च संभाषादशुच्युपहतस्य च संदेहेषु च सर्वेषु

घायेजातीफलादौ समाचारादित्याहुः भक्ष्येकटुकषाये तथा चात्र लघुहारीतः कषायकटुताम्बूले भुक्तस्नेहानुलेपने मनुः उच्छिष्टे
न तु संस्पृष्टो द्रव्यहस्तः कथंचन अतिधायैव तद्द्रव्यमाचांतः शुचितामियात् द्रव्यमन्नपानादिमतिरिक्तं तथा च बृहस्पतिः मनुस्वा
न्नपानेषु यद्रोच्छिष्टमुपस्पृशेत् भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि कृत्वा मूत्रं पुरीषं च द्रव्य
हस्तो न दुष्यति शौचं तु कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात् द्रव्यहस्तो गृहीतद्रव्यः द्रव्यपदं चासं
कुचितमेव कृत्वा मूत्रपुरीषं च द्रव्यहस्तः कथंचन भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथाविधि तत्संयोगात्तु पक्वान्नमुपस्पृश्य ततः शुचि
रित्यापस्तम्बवचनात् प्रक्षाल्य पादौ निःक्षिप्य आचम्याभ्युक्षणं पुनः पुष्पादीनां तृणादीनां प्रोक्षणं हविषां तथेति वायुपुराणवचना
च्च निःक्षिप्य द्रव्यं भूमौ घृतलेख्यर्थः अथ दंतधावनं तत्र दक्षः उषःकाले तु संप्राप्ते शौचं कृत्वा यथाविधि ततः स्नानं प्रकुर्वीत दंतधावनपू
र्वकं उषःकालः संध्यातः पूर्वं प्राचीप्रकाशवान् याज्ञवल्क्यः प्रातःसंध्यामुपासीत दंतधावनपूर्विकां अत्र स्नाने संध्यायां च दंतधावन
स्य नाङ्गत्वं मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः तस्मात्पूर्वं प्रयत्नेन भक्षयेद्दंतधावनमिति वृद्धशातातपेनाचमनवत् स्वतंत्रसेवशु
द्धिहेतुतयाभिधानात् एवं च दंतान्प्रक्षाल्य स्नायादिति कुंदोगपरिशिष्टेपि कालार्थः संयोगः कुंदोगपरिशिष्टे उत्थाय नेत्रे प्रक्षाल्य शु
चिर्भूत्वा समाहितः परिजप्य च मंत्रेण भक्षयेद्दंतधावनं आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि वन
स्पते शुचिर्भूत्वा चमेत्यर्थः मंत्रेणायुर्बलमित्यादिना वक्ष्यमाणेन भक्षयेदिति दंतघर्षणाभिप्रायं तदुक्तमत्रैव नारदाद्युक्तवार्क्षीयमष्टां
गुलमपादितं सत्वचं दंतकाष्ठं स्यात्तदग्रेण प्रधावयेदिति अत्र नरसिंहपुराणे प्रादेशमात्रमपि वा वस्वंगुलमथापि वा विष्णुः कनीन्य

ष्टोभवति अंतरास्येसद्भिर्यावन्नहस्तेनस्पृशति वसिष्ठः नश्मश्रुगतोलेपः अशुचिरितिशेषः गौतमः दंतश्लिष्टेदंतवत् अन्यत्र
जिह्वाभिमर्षणात् प्राक्च्युतेरित्येके च्युतेरास्रावववद्विद्यात् निगिरन्नेवतच्छुचिः प्राक्च्युतेरित्येकइतिजिह्वाश्लिष्टमपिदं
तलग्नंयदिनच्यवतेतदाशुद्ध्यतीत्यर्थः तेनदंतलग्नंजिह्वास्पृष्टमाचमनार्थमाकर्षणीयं यदिनच्यवतेतदा दंतलग्नेसत्याचमनंन
कर्तव्यं तथादेवलः भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् दंतलग्नमसंहार्यंलेपंमन्येतदंतवत् नतत्रबहुशःकुर्याद्यत्नमुद्ध
रणेपुनः भवेदशौचमत्यर्थंतृणावेधाद्व्रणेकृते च्युतेरित्यादि यद्दंतलग्नमाचमनोत्तरंच्यवते तदाप्यास्रावववल्लालावन्निगिरन्नेवशुध्यति
तथावसिष्ठःदंतवद्दंतलग्नेषुयच्चाप्यंतर्मुखेभवेत् आचांतस्यावशिष्टंस्यान्निगिरन्नेवतच्छुचिः यच्चापीतिदंतच्युतमप्यन्नकर
णादियत् प्रमादावशिष्टमाचमनोत्तरमुपलभ्यते तदपिनिगिरन्नेवशुध्यतीत्यर्थः शंखः दंतवद्दंतलग्नेषुरसवर्जनं मनुः नो
च्छिष्टंकुर्वते मुख्याविप्रुषोऽङ्गंनयंतियाः अस्यायमर्थः मुख॥ च्युताजलबिंदवोभूमिपतिताःस्पृष्टाअपिशुचायः अंगलग्नास्तु
रोमहृपत्केदसमर्थाआचमनहेतवः तथाचपैठीनसिः भूमिगताबिंदवः परामृष्टाःपूताविप्रुषः शुद्धःहिलोमक्लिन्नेषाचामेत
तथास्पृष्टांतिबिंदवः पादेयआचामायतःपरान् भूमिगैस्तैसमाज्ञयान्नैरप्रयतोभवेत् अत्रांगिरिसो मधुपर्केचसोमेच
अप्सुप्राणाहुतीषुच नोच्छिष्टस्तुभवेद्विप्रोयथात्रेवचनंतथा अप्सुउच्छिष्टतानिषेधात् पीत्वापइतिनैमित्तिकमाचमनंप्र
यतोपीतिश्रवणाच्च एवंचपीत्वापइत्याचमनविधिभयादस्त्वित्यपोशानविषयंप्राणाहुतिसन्निकर्षादितिकल्पतरुकारादीनां।
व्याख्यानमशुद्धं शातातपः दंतलग्नेफलेमूलेभस्येस्नेहेतथैवच ताम्बूलेचेक्षुखंडेचनोच्छिष्टोभवतिद्विजः फलेकटुतिक्तक

षायेजातीफलादौ समाचारादित्याहुः भक्ष्ये कटुकषाये तथा चात्र लघुहारीतः कषायकटुताम्बूले भुक्तस्नेहानुलेपने मनुः उच्छिष्टे
न तु संस्पृष्टो द्रव्यहस्तः कथंचन अतिधायैव तद्द्रव्यमाचान्तः शुचितामियात् द्रव्यमन्नपानादिम्अतिरिक्तं तथा च वृहस्पतिः मनुष्या
न्नपानेषु यद्युच्छिष्टमुपस्पृशेत् भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि कृत्वा मूत्रपुरीषं तु द्रव्य
हस्तो न दुष्यति शौचं तु कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात् द्रव्यहस्तो गृहीतद्रव्यः द्रव्यपदं चासं
कुचितमेव कृत्वा मूत्रपुरीषं च द्रव्यहस्तः कथंचन भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथाविधि तत्संयोगात्तु पक्वान्नमुपस्पृश्य ततः शुचि
रित्यापस्तम्बवचनात् प्रक्षाल्य पादौ निःक्षिप्य आचम्याभ्युक्षणं पुनः पुष्पादीनां तृणादीनां प्रोक्षणं हविषां तथेति वायुपुराणवचना
च्च निःक्षिप्य द्रव्यं भूमौ घृले स्यर्थः अथ दंतधावनं तत्र दक्षः उषःकाले तु संप्राप्ते शौचं कृत्वा यथाविधि ततः स्नानं प्रकुर्वीत दंतधावनपू
र्वकं उषःकालः संध्यान्तः पूर्वम्प्राचीप्रकाशवान् याज्ञवल्क्यः प्रातःसंध्यामुपासीत दंतधावनपूर्विका अत्र स्नाने संध्यायां च दंतधावन
स्यनाङ्गत्वं मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः तस्मात्पूर्वं प्रयत्नेन भक्षयेद्दंतधावनमिति वृद्धशातातपेनाचमनवत् स्वतंत्रे सेवशु
द्धिहेतुतयाभिधानात् एवं च दंतान्प्रक्षाल्य स्नायादिति छंदोगपरिशिष्टेपि कालार्थः संयोगः छंदोगपरिशिष्टे उत्थाय नेत्रे प्रक्षाल्य शु
चिर्भूत्वा समाहितः परिजप्य च मंत्रेण भक्षयेद्दंतधावनं आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ब्रह्म प्रज्ञां च मेधां च त्वन्नो धेहि वन
स्पते शुचिर्भूत्वाचम्येत्यर्थः मंत्रेणायुर्बलमित्यादिना वक्ष्यमाणेन भक्षयेदिति दंतघर्षणाभिप्रायं तदुक्तमत्रैव नारदाद्युक्तवार्क्षीयमष्टां
गुलमपाटितं सत्वचं दंतकाष्ठं स्यात्तदग्रेण प्रधावयेदिति अत्र नरसिंहपुराणे प्रादेशमात्रमपि वा वसुगुलमथापि वा विष्णुः कनीन्य

आ० द० ७

ग्रस्तमस्योर्ध्वसकूर्च्चंद्वादशांगुलं प्रातर्भुक्त्वाचयतवाक्भक्षयेद्दंतधावनं सकूर्च्चंचूर्णितागंभुक्त्वाचेतिभोजनोत्तरंदंतलग्ननिर्हरणार्थंदंतधा
वनमित्यर्थः भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेदिति देवलवचनात् एवंचात्रदंतधावनेकालादिनिषेधोनादर्तव्यः सामर्थ्यात्तहला
युधनिबंधेतु भुक्तेतियतिविषयतयाव्याख्यातं तथा अद्यादुदङ्मुखःप्राङ्मुखोवा महाभारते तथा प्रक्षाल्यपादौहस्तौचमुखंचसु
समाहितः दक्षिणंवाहुमुद्धृत्यकृत्वाजान्वंतरंततः प्राङ्मुखश्चोपविष्टश्चभक्षयेद्दंतधावनं दक्षिणंवाहुमुद्धृत्यउपवीतीभूत्वेत्यर्थः वि
ष्णुः प्रक्षाल्यभुक्त्वातज्जह्यात्शुचौदेशेप्रयत्नतः नरसिंहपुराणे तस्मात्क्षुधकमथार्द्रंवाभक्षयेद्दंतधावनं खदिरश्चकदंबश्चकरंजश्चव
टस्तथा तिंत्रिणीवेणुपृष्ठंचआम्रनिम्बौतथैवच अपामार्गश्चविल्वश्चअर्कश्चोदुम्बरस्तथा एतेप्रशस्ताःकथितादंतधावनकर्मणि दंतका
ष्ठस्यवक्ष्यामिसमासेनप्रशस्ततां सर्वेकंटकिनःपुण्याःक्षीरिणश्चयशस्विनः अत्रविष्णुःवटासनार्कखदिरकरंजकरवीरसर्ज्जारिमेदापामार्ग
मालतीककुभविल्वानामन्यतमंकषायंकटुतिक्तंवा असनः आसनइतिप्रसिद्धः सर्ज्जःशालः अरिमेदोविट्खदिरः अत्रहारीतः विल्व
खदिराम्रपालासशिरीषापामार्गाणामेकतमं पालासः आम्रातकः तथापालाशकोविदारः श्लेष्मातकतिल्वकशाकवृक्षनिर्गुंडीशिखंडिवेणु
वर्ज्जेतिल्वकः चिहुइतिप्रसिद्धः शिखंडीमयूरशिखा वेणुनिषेधस्तुगिरविषयः शाकवृक्षःसगमनइतिप्रसिद्धः प्लक्षमाषकरवीरकरंजशमी
शिंशिपाइत्येके दधित्थहरीतक्यऽश्वत्थशाल्मलकानिइत्यपरे एकेऽपरेइत्युभयत्रवर्ज्जयितव्यमितिशेषः तथानार्द्रेनाशुचिनातिशुष्केनातिस्थूलम
पाटितागमनोष्ठग्रंथि अनार्द्रमिति सच्चस्थितच्छिन्ननिवृत्त्यर्थम् विधिस्तुपूर्वमीषदार्द्रस्य अपाटितागम् अचूषितागम् अनोष्ठग्रंथि ओष्ठस्प
र्शिग्रंथिविहीनं विष्णुः नश्लेष्मातकारिष्टविभीतकधवधन्वनजलकोविदारशमीपीलुपिप्पलेंगुदीगुग्गुलजं नबर्बूरनिर्गुंडीशिग्रुतिल्व

रामः ७

स्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः एतानि सततं पश्येन्नमस्येच्चार्चयेच्च यः प्रदक्षिणं च कुर्वी
त तथा सायुर्न हीयते वामनपुराणे कृत्वा शिरः स्नानमथाह्निकं च संपूज्य तोयेन पितॄन्स देवान् होमं च कृत्वा लभनं शुभानां ततो बहिर्निर्ग
मनं प्रशस्तं दूर्वा दधि सर्पिरथोदकुंभं धेनुं सवत्सां वृषभं सुवर्णं मृद्गोमयं स्वस्तिकमक्षतानि राजा मधु ब्राह्मणकन्यकाश्च श्वेतानि पुष्पा
णि तथा शमी च हुताशनं चंदनमर्कबिंबं अश्वत्थवृक्षं च समालभेत ततस्तु कुर्यान्निजजातिधर्म्मं देशानुशिष्टं कुलधर्ममग्र्यं स्वगो
त्रधर्म्मं न हि संत्यजेच्च आह्निकमहः स्नानं एतच्चाभ्युदयादौ अरुग्दिवा चरेत्स्नानं मध्याह्नात्प्राग्विशेषत इति वसिष्ठवचनात्
यद्वा आह्निकं सर्वमहः कृत्यमुच्येत तदा संपूज्येत्यादि व्यर्थं स्यात् संपूज्य तोयेनेति तर्पणपरं आलंभनं स्पर्शनं शुभानां वक्ष्यमाण
दूर्वादीनां स्वस्तिको भवनप्रभेदः अर्कबिंबसमालंभनं निरीक्षणपर्यवसितं दक्षः द्वितीये च तथा भागे वेदाभ्यासो विधीयते वेदस्वी
करणं पूर्वं विचारोभ्यसनं जपः तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा समित्पुष्पकुशादीनां स कालः समुदाहृतः स्वीकरणमध्य
यनं एतच्च ब्रह्मचारिणः गृहस्थस्याप्यनधीतवेदादिभागे तथा चापस्तम्बः यया विद्यया च विरोच्येत तां पुनराचार्यमुपेत्य साधयेदि
ति याज्ञवल्क्यः वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च यमः दानेन तपसा यज्ञैरुपवासव्रतैस्तथा न तां गतिमवाप्नोति विद्य
या यामवाप्नुयात् विद्यया ब्रह्मविद्येयं निमाख्यानमशुद्धं शास्त्रानुक्रमेणाभिधानात् दक्षः तृतीये च तथा भागे योष्यवर्गार्थसाधनं
गौतमः योगक्षेमार्थमीश्वरमधिगच्छेत् अथ स्नानविधिः तत्र दक्षः चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् शातातपः शुचौ देशे
तु सा ग्राह्या शर्कराश्मादिवर्जिता रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता न मृदं नोदकं वापि न निशायां तु गोमयं न गोमूत्रं तु प्रदोषे तु

गृण्हीयाद्बुद्धिमान्नरः निशायामितिनमृदंनोदकमित्यत्रापिसंबध्यतेतथावल्मीकाखूत्कराल्लेपाज्जलाच्चपथिवृक्षयोः कृतंशौचाव
शिष्टाच्चनग्राह्यासप्तमृत्तिकाः आखूत्करोमूषकोत्कीर्णमृत्तिकास्थानं लेपः कुड्यादीनां दक्षः मृत्तिकाःसप्तनग्राह्यावल्मीकेमूष
कोत्करे अंतर्जलेश्मशानेचवृक्षमूलेसुरालये परस्नानावशिष्टाचश्रेयस्कामैःसदाबुधैः व्यासः स्नानंमध्यदिनेकुर्यात्सुजीर्णेऽन्ने
निरामयः एवंच स्वप्नमध्ययनंस्नानमुच्चारंभोजनंहुतिं उभयोःसंध्ययोर्नित्यंमध्यान्हेचविवर्जयेत् इतिदेवलीयोनिषेधोरागप्राप्त
स्नान मध्यान्होऽत्राभिजिद्बेलापंचमभागेभोजनस्यवक्ष्यमाणत्वात् योगियाज्ञवल्क्यः उभेसंध्येचस्नातव्यंब्राह्मणैर्गृहमाश्रितैः ति
स्रःष्वपिचसंध्यासुस्नातव्यंचतपस्विना उभेसंध्येचप्रातर्मध्यान्हेचतपस्विनावनस्थेनयतिनाच बौधायनः अंभोवगाहनंस्नानंवि
हितंसार्ववर्णिकम् विष्णुः उद्धृताद्भूमिष्ठमुदकंपुण्यंपस्थावरात्प्रस्रवंतस्मान्नादेयंतस्मादपिसाधुगृहीतंसर्वतएवगांगं शंखः अद्भिर्गा
त्राणिशुध्यंतितीर्थस्नानाद्भवेत्फलं मनुः नदीषुदेवखातेषुतडागेषुसरःसुच स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच देवखातेषुस
र्य्यादिदेवसमीपखातेषु प्रस्रवणेषुनिर्झरेषु नित्यमित्युक्तेर्जीवदधिकारः सवस्त्रोऽहरहराप्लवतेतिसांख्यायनगृह्यम् अथातोनि
त्यस्नानमितिकात्यायनाच्च एवंचानित्यस्नानेनद्यादीनामंगत्वं त्रिरात्रफलदानद्यइत्यपिनित्यस्नानः प्रकरणस्थवचनाद्गुणफल
तापिप्रकरणांतरेकृतीर्थस्नानंस्वर्गादिफलकंसाधिकारमेवेतिच्छंदोगपरिशिष्टे धनुःसहस्राण्यष्टौचगतिर्यासांनविद्यतेननान
दीशब्दवहागर्त्तास्ताःपरिकीर्तिताः धनुर्हस्तचतुष्कं तथा पयद्वयंश्रावणादिसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वीतवर्जयित्वा
समुद्रगाः उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच चंद्रसूर्यग्रहेचैवरजोदोषानविद्यते पयोमासः मनुः नस्नानमाचरेद्भुक्त्वानातुरोन

कतिंदुकजं नपारिभद्राम्लिकामोचकाशाल्मलीशणजम् नमधुरंनाम्लंनोर्द्धंशुष्कंनशुषिरंनपूतिगंधिनपिच्छलंधन्वनः धामनिरितिप्रसिद्धः।
निर्गुंडीसिंदुवारः महाभारते त्याज्यंसपत्रमज्ञातमूर्द्धंशुष्कंचपाटितं त्वग्विहीनंग्रंथिमुखंतथापालाशशांशिपं ऋजुंवितस्तिमात्रंचकीटाग्नि
भिरदूषितं ऋजुमित्यादिनाविधिः उशनाः नांगुलीभिर्दंतान्प्रक्षालयेत् अत्रचशेषोर्थदंतधावनेविहितखदिरादि द्रुमविशेषाभावेसा
मान्यशास्त्रानुग्रहायसर्वशक्तिन्यायात् द्रुमांतरोपादानशक्तौपालाशादिनिषेधाः सार्थकाः अत्रमहाभारते पर्वस्वपिचवर्जयेत् नरसिंहपुरा
णे प्रतिपद्दर्शषष्ठीषुनवम्यांचैवसत्तमाः दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलं अलाभेदंतकाष्ठानांप्रतिषिद्धदिनेतथा अपांद्वादशगं
डूषैर्मुखशुद्धिर्विधीयते अथप्रातःस्नानादि तत्रछंदोगपरिशिष्टे कात्यायनः यथाहनितथाप्रातःस्नायान्नित्यमनातुरः दंतान्प्रक्षाल्यन
द्यादौगेहेचेत्तदमंत्रवत् अत्यत्वाद्धोमकाल स्यवहुत्वात्स्नानकर्मणः प्रातर्नतनुयात्स्नानंहोमलोपोविगर्हितः गेहेइत्युद्धृतजलस्नानोप
लक्षणं नद्याद्यभावेविधानात् विष्णुः प्रातःस्नायादरुणकरग्रस्तांप्राचीमवलोक्यस्नायात् अरुणकरग्रस्तामितिसंध्यापूर्वकालपरं सं
ध्यायांनिषेधादितिहरिहरः तदयुक्तं संध्यापूर्वकालेपि रात्रित्वेननिषेधात् तस्मादरुणकरग्रस्तामित्यसंकुचितमेव अतएवतत्रतत्र
संध्यास्नानकीर्तनं अत्रचउदयात्प्राक् प्रातःस्नानविधानात् सूर्योदयंविनानैवस्नानदानादिकाः क्रियाइतिमार्कंडेयपुराणमित
रविषयंतथा अलक्ष्मीकालकर्णीचदुःस्वप्नंदुर्विचिंतितं अम्भात्रेणाभिषिक्तस्यनश्यंतइतिधारणा कालकर्णीराक्षसी अम्भात्रेणेति
मंत्रादिकंविनापीत्यर्थः धारणानिश्चयः दक्षः प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहितं सर्वमर्हतिपूतात्माप्रातःस्नायीजपादिकं दृष्टं
कर्माधिकारः अदृष्टंजपादिद्वारापरलोकसिद्धिः एतच्चसर्वमर्हतिइत्यनेनैववक्तव्यं अदृष्टंपापक्षयइतिकेचित् नरसिंहपुराणे।

पूर्वीसंध्यांसनक्षत्रामुपासीतयथाविधि गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनं अनुदितहोमीतरविषयमेतत् दक्षः संध्याकर्म्मावसाने
तुस्वयंहोमोविधीयते तत्रानुकल्पमाह ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविद्पतिः एतैरेवहुतंयत्तुतद्धुतंस्वयमेवहि विद्यतिर्यामाता
वराहपुराणे उदयान्निःसृतंसूर्यंयस्तुभक्त्यानरोद्विजः दध्यक्षतांजलिभिस्तुतिस्रभिः पूजयेच्छुचिः तस्सभावप्रपन्नस्याशुभंयत्समुपार्जि
तं तत्क्षणादेवनिर्दग्धंभस्मीभवतितस्यतत् मनुः मैत्रप्रसाधनंस्नानंदंतधावनमंजनं पूर्वाण्हएवकुर्वीतदेवतानांचपूजनं पूर्वापहए
वेतिपुरीषोत्सर्गेसतिसंभवेनियमः केशप्रसाधनेचोत्सवादिनिमित्ताभावेदंतधावने भोजनोतरविहितेनरे अंजनेभेषजेतरेसौवीरांज
नादौस्नानेदेवपूजनेचमध्यान्हादिविहितेतरे विष्णुपुराणे आचांतश्चततःकुर्यात्पुमान्केशप्रसाधनं आदर्शांजनमंगल्यदूर्वाद्या
लंभनानिच छंदोगपरिशिष्टे श्रोत्रियंसुभगांगांचअग्निमग्निचितंतथा प्रातरुत्थाययःपश्येदापद्भ्यःसविमुच्यते तथा पापिष्टंदुर्भ
गांनद्यंनग्नमुत्कृत्तनासिकं प्रातरुत्थाययःपश्येत्तत्कलेरुपलक्षणम् अष्टभागीदिनंविभज्यप्रथमभागकृत्ये दक्षः देवकार्यततःकृ
त्वागुरुमंगलवीक्षणं गुरुःपित्रादिःमंगलंश्रोत्रियादिः मनुः देवतामभिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् ईश्वरंचैवरक्षार्थंगुरुमेवचपर्वसु
छागलेयोयमोपिद्वितीये पतीनांदर्शनंचैवस्पर्शनंभाषणंतथा कुर्वाणःपूयतेनित्यंतस्मात्पश्येत्तुनित्यशः अग्निचित्कपिलासत्रीराजाभि
क्षुर्महोदधिः दृष्टमात्राःपुनन्त्येतेतस्मात्पश्येत्तुनित्यशः सत्री अन्नादिसत्रशीलः कृतसत्रयागइत्येकेभिक्षुर्यतिः महाभारते यज्वा
मिष्टान्नदःसत्रीशतायुर्धार्म्मिकःशुचिः ज्ञानसिद्धास्तपःसिद्धान्दृष्ट्वापापात्प्रमुच्यते वाराहपुराणे ब्राह्मणंवामनंदृष्ट्वावराहंचजलो
त्थितं नमस्येच्चैवयोभक्त्यासपापेभ्यःप्रमुच्यते ब्रह्मपुराणे० स्वमात्मानंघृतेपश्येत्तयदीच्छेच्चिरंजीवितुं आत्मानंशरीरं नारदः लोके

महानिशि नवासोभिः महाजस्ले नाविज्ञातेजलाशये नभुत्का नमहानिशीतिनिषेधश्चांडालादिस्पर्शनिमित्तकस्नाने नास्ति नाप्रयत्तः
क्षणमपितिष्ठेदितिवोधनात् महानिशा रात्रिमध्यस्थप्रहरद्वयं नातुरइतिरोगस्थस्नानसंवर्द्धनीयत्वेनदृष्टार्थत्वात् अविज्ञातेऽगा
धनयानक्रादिरहितयाच कृत्रिमेप्रतिष्ठिताप्रतिष्ठितत्वाभ्यामपि देवलः एहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्यान्नि
शिकाम्यव्रतेषुच असयोमृतकं वृद्धिः पुत्रजन्मादिः वामनपुराणे स्नायाच्छिरःस्नानतयाननिसंनाकारणंचैवसदानिशासु ग्रहोपरागंस्व
जनातियानंमुक्त्वाचजन्मर्क्षगतंशशांकम् शिरःस्नानतयाशिरोनैकार्यम् वैधंतुनितस्नानंकर्त्तव्यमेव अकारणमित्यनेनरागप्रयुक्त
जलक्रीडादिनिवृत्तिः आपस्तम्बः सशिरोऽवमज्जनमप्सुवर्जयेदस्तमितेचस्नानं सशिरोवमज्जनंशिरोनैकार्यम् हीरिहरेणअशिरोवम
ज्जनमितिपठितं गात्रप्रक्षालनमात्रमपिजलंप्रविश्यनकर्त्तव्यमितिव्याख्यातम् अत्रचास्तमितमात्रेस्नाननिषेधात् नरात्रौनमहानि
शीतिदोषातिशयार्थंदृष्टार्थंवा तत्रविष्णुः नसंध्यायांरागप्राप्तजलक्रीडादिस्नाननिषेधोयंवैधस्यसंध्यायांविधानात् हारीतः नचत्वरो
पहारयोः स्नायात् शंखलिखितौ ननग्नःस्नायात् अत्रनग्नस्नाननिषेधात् पूर्वंचनवासोभिरितिवस्त्रबहुलनिषेधात् एकवस्त्रत्वेद्विवस्त्र
त्वंचाविरोधिनार्द्रमेकंचवसीनेतिपुरुषार्थत्वान्नस्नानविधौदोषमावहति अथवाहोमदेवार्चनाद्यासुक्रियास्वाचमनेतथानैकवस्त्रः
प्रवर्त्तेतद्विजवाचनिकेजपइतिविष्णुपुराणे एकवस्त्रतानिषेधाद्द्विवस्त्रतानियमएव अत्रव्यासः नभुक्त्वालंकृतोरोगीशंखलिखितौ॰
अमेध्योदकंपरिहरेत तथानसमुद्रोदकमवगाहेत योगियाज्ञवल्क्यः प्रभूतेविद्यमानेतुविमलेतुमनोहरे नाल्पोदकेद्विजःस्नायान्न
दींचोत्सृज्यकृत्रिमे विष्णुः नपरनिपानेषुस्नानमाचरेत आचरेद्यापंचपिण्डानुद्धत्यापदिपरनिपानेषुपरकृतजलाशयेषु पंचपिण्डाननुद्धृ

स्पनस्नायात्परवारिणि निपानकर्तुः स्नात्वा तु दुःकृतांशेन लिप्यत इति मनुस्मरणात् पंचपिंडानि निसेतुकूपमतिरिक्तजलाशये निरू
द्धासु च मृत्पिंडान्कूपात्तु त्रीन्घ्यंसस्तथेति बौधायनदर्शनात् तथा निरुद्धासु च न स्नायादंशभाक्कृतत्र सेतुकृत् तत्र प्राचः अप्रतिष्ठित
मात्रेषु पिंडोद्धारस्तत्सेव परकीयत्वादित्याहुस्तन्नीनहरिहरादयः अप्रतिष्ठितजलत्वेन तत्र स्नानाभावात् परस्वोपयोगे चौर्यापत्तेर्म
न्वादौ परकृतत्वस्य परकीयत्वावगमाच्च योगियाज्ञवल्क्यः अग्राह्या अगता आपो नद्याः प्रथमवेगिकाः प्रक्षोभिताश्च केनापि याश्च
तीर्थाद्धि निःसृताः गंगादिप्रवाहाद्विच्छिन्नाः तथा पादेन पाणिना वापि यस्यावस्त्रेण चोदकम् नायहन्यान्नापवदेन्नच प्रक्षोभयेद्बुधः शं
खलिखितौ नाप्सु मेहेन्नोद्वर्षणं कुर्यात् उद्वर्षणं गात्रमलप्रक्षालनम् बौधायनः आपो देवगृहं गोष्ठं यत्र संति च ब्राह्मणाः अप्रक्षा
ल्य पादौ नांतः प्रवेष्टव्यम् देवलः न नदीषु नदीं ब्रूयात्पर्वतेषु च पर्वतं नान्यत्प्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषु च अंगिराः विना दर्भैश्च यत्स्ना
नं यच्च दानं विनोदकं असंख्यातं तु यज्जप्तं तत्सर्वं निःफलं भवेत् न स्नानवर्णकयोरग्रे प्रपच्छेतान्यत्र देवगुरुब्राह्मणेभ्यः जाबालिः त्रयोदश्यां
तृतीयायां दशम्यां च विशेषतः शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथंचन यथासंख्यमत्र आपस्तम्बः अस्पृश्यस्पर्शने वांते अश्रुपाते क्षु
रभंगे स्नानं नैमित्तिकं कार्यं देवपित्र्यविवर्जितम् देवपित्र्यविवर्जितमिति नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते तर्पणं तु भवेत्तस्य अं
गत्वेन प्रकीर्त्तितमिति ब्रह्मपुराणवचनात्स्नानमात्रतः प्रसक्तस्य तर्पणस्य च व्यावृत्तिः यमः अजीर्णेऽभ्युदिते वांते श्मश्रुकर्मणि मैथुने दुः
स्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते अभ्युदिते शुद्धोद्धारादिनाभिव्यक्ते एतच्चोत्तरकालस्नानप्राप्त्यर्थं अजीर्णावस्थायां निषेधात्॥
अभ्युदिते वांते इति संबंधे पर्युषिते वांत इति विशेषः दुर्जनोऽत्र चांडालादिः मात्रपदेन सर्वांगव्यावृत्तिः तस्मात्प्रयासनिमित्तिके स्नाने मज्जे

नमात्रेणशुद्धिः गौतमः पतितचांडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलोदकोपस्पर्शनाच्छुद्धो भवति अत्र च शवस्पर्शि
नस्तत्स्पर्शिनश्च स्पर्शे स्नानविधानात् उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यतीति देवलवचनं
पतितादिस्पर्शिस्पर्शे संकोचनीयं तत्स्पृष्टिपदं पतितादिस्पर्शिनोप्याहेति केचित् तदयुक्तम् द्वंद्वद्वयगौरवात् एकद्वंद्वे चासन्निहितपर
त्वमेव भेदः उदकोपस्पर्शनं स्नानं बौधायनः चांडालेन सहाध्वगमने सचैलस्नानम् पराशरः चैत्यवृक्षश्चितिर्यूपश्चांडालः सोमवि
क्रयी एतांस्तु ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत् सचैलो यद्वस्त्रधरः सन् स्पृष्ट्वा तद्वस्त्रसहित इत्यर्थः जलमाविशेदिति वारुणस्नानोप
लक्षणम् तथा श्वकाकैरवलीढस्य नखैर्विदलितस्य च अद्भिः प्रक्षालनं शौचमग्निना चोपचूडनम् इदं च स्नानं विनैव शुद्धिः शिरोव्यतिरिक्त
गात्रोपघाते उपचूडनं ज्वालया स्पर्शनं च्यवनः श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं यूपं चितिं चितिकाष्ठं मद्यं मद्यभांडं स
स्नेहं मानुष्यास्थि शवस्पृष्टं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचैलमंभोवगाह्य उत्तीर्याग्निमुपस्पृशेद्गायत्र्यष्टशतं जपेत् घृतं प्रा
श्य पुनः स्नात्वा त्रिराचामेत् अग्निस्पर्शनादिकामकृते स्मृत्यंतरे स्नानमात्रविधानात् आपस्तम्बः एकशाखां समारूढश्चांडाला
दिर्यदा भवेत् ब्राह्मणस्तत्र आसीनः स्नानेन शुचितामियात् कालिकापुराणे स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा ह्याप्लुतः शुचिः एतदप
नीतनिर्माल्ये बोद्धव्यम् व्यासः भासवानरमार्जारखरोष्ट्राणां शुनां तथा सूकराणाममेध्यं च स्पृष्ट्वा स्नायात्सचैलकम् लघुहारीतः श्व
विष्ठां काकविष्ठां वा कंकगृध्रनरस्य च अधोच्छिष्टं तु संस्पृश्य सचैलो जलमाविशेत् अधोच्छिष्टं मूत्रोत्सर्गेणाशुद्धः देवलः मानुषास्थि व
शां विष्ठामार्तवं मूत्ररेतसी मज्जानं शोणितं वापि परस्य यदि संस्पृशेत् स्नात्वापमृज्य लेपादीनाचम्य शुचितामियात् तान्येव स्वानि संस्पृश्य पूतः

आ० द० ११

स्नात्परिमार्जनात् तदनंतरमाचमनंप्राप्नमेव विष्णुः नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः सुराभिर्मद्यैर्वा चोपहतो मृत्तोयैस्तदंगं प्रक्षाल्या
तंद्रितः शुद्धो भवति अन्यत्रोपहतो तदंगं मृत्तोयैः प्रक्षाल्य स्नानेन शुद्धो भवति चक्षुष्युपहते उपोष्य स्नात्वा पंचगव्येन शुद्ध्यति दशन
च्छदोपहतश्च प्रबाहुर्हस्तः अतन्द्रितः इत्याचमनप्राप्त्यर्थम् अन्यत्र उपहते उक्तेतरकायस्पृष्टः अंगिराः इन्द्रियेषु प्रविष्टस्यादमेध्यं य
दि कर्हिचित् मुखेपि संस्पर्शगतं स्नानं तत्र विधीयते शंखः रथ्याकर्दमतोयेन ष्ठीवनाद्येन वाप्यथ नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन
शुध्यति ब्रह्मपुराणे उच्छिष्टेनाथ विप्रेण विप्रः स्पृष्टस्तु तादृशः उभौ स्नानं प्रकुरुतः सद्य एव समाहितौ तथा मानुषास्थि तु संस्पृश्य द
ग्धं सस्नेहमेव वा स्नायात् गां संस्पृशेत् सूर्यं पश्येद्विष्णुमनुस्मरेत् दग्धस्पर्शे कामकृते स्नानं आचम्यैव चानिः स्नेहमिति मनुवचनात् मनुः
वांतो विरक्तः स्नात्वा तु घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम् भुक्त्वान्नं वांत इत्यर्थः तेन सद्यो वमने आचमन
मात्रम् एवकारेण स्नाननिवृत्तिः मैथुनिनः ऋतावितिशेषः बृहस्पतिः पतितं सूतिकामंत्यं शवं स्पृष्ट्वानुकामतः स्नात्वा सचेलं स्पृष्ट्वा
ग्निं घृतं प्राश्य विशुध्यति मनुः अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति शुद्धेरित्यनुवृ
त्तौ विष्णुः सर्वस्यैव प्रेतस्य बांधवैः सहाश्रुपातकृत्स्नानेन अकृते अस्थिसंचयने सचैलस्नानेन देवलः श्वपाकं पतितं व्यंग्यमुन्मत्तं शव
हारकम् सूतिकां सूपिकां नारीं रजसा च परिप्लुताम् श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः सचैलं सशिरः स्नात्वा तदानीमेव शुध्यति
श्वादिभिः शिरःस्पर्शे स्नानं गात्रांतरस्पर्शे क्षालनाचमनमात्रम् तथा च शातातपः रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ चेलनिर्णेज
कश्चैव नटः शैलूषकस्तथा मुखेभगस्तथा श्वा च वनिता सर्ववर्णगा चक्री ध्वजी वध्यघाती ग्राम्यकुक्कुटशूकरौ एभिर्यदंगं संस्पृष्टं शिरोव

रामः ११

वं स्नानं न कुर्यात् असामर्थ्यमुत्पन्नरोगत्वम् अप्राप्तेः समुत्पन्ने स्नानमेव समाचरेत् स्नानमेवेतिवारुणस्नानपरम् जाबालिः अशिर
स्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः हारीतः आग्नेयं भस्मनास्नानमद्भिर्वारुणमुच्यते आ
पो हि ष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतं यत्तु सातपवर्षेण स्नानं दिव्यमिहोच्यते एतेषु मंत्रगः स्नात्वा तीर्थानां फलमाप्नुयात् मंत्रग इ
ति नपंचस्वपि स्नानेषु मंत्रविधायकं ब्राह्मवारुणयोर्मंत्रस्य प्राप्तत्वात् किंतु तदनुवादकमेव फलसंबंधपरत्वात् अत्र योगियाज्ञवल
क्येन मृदालंभस्तु पार्थिवमिति मानसं विष्णुचिंतनमिति स्नानद्वयमधिकमुक्तम् कात्यायनः अथातो नित्यस्नानम् नद्यादौ मृद्गोमय
कुशतिलसुमनस आहृत्योदकांतं गत्वा शुचौ देशे प्रतिष्ठाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्य उरुं ष्ठहोति
ताय मामं त्यावर्तयेद्ध्येनेशनमिति सुमित्रिया न इति योंजलिमादाय दुर्मित्रियाइति द्वेष्यं प्रति निषिंचेत्कटिं वस्त्यूरुजंघे चरणौ करौ मृदा त्रि
स्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेद्गां गानि मृदे दं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्योन्म
ज्याचम्य गोमयेन विलिंपेन्मानस्तोक इति ततोभिषिंचेदिमं मे वरुण इति च नस्त्रिभिमींपउदुत्तमं मुंचंत्वऽवभृथेत्येतैश्च तन्निमज्योन्मज्या
चम्य दर्भैः पावयेदापो हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीरापइति द्वाभ्यामापो देवा द्रुपदादिव शन्नो देवीरपां रसमपो देवी पुनंतु मेति
नवभिश्चित्तानिर्मित्सोंकारेणव्याहृतिभिर्गायत्र्यादावंते चाऽत्सु जले घमर्षणं त्रिरावर्तयेद्द्रुपदां वा आयं गौरिति वा त्र्यृचं प्राणायामं वा सशिर
ओमिति वा विष्णोर्वा स्मरणम् अथ तिलतीर्थभागानंतर्यार्थं यतः स्नानेन कर्माधिकारः अतो नित्यमहरहः स्नानं कर्तव्यमित्यर्थः यद्वा
ह विष्णुः स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि पवित्राणां तथा जप्ये दाने च विधिदर्शिते नन्वहरहः स्नानस्य नित्यत्वबलादेवकर्तव्यता

आ॰ द॰ १२

कथं शुद्धिर्विधीयते जातवेदाः सुवर्णं च सोममार्गं तथैव च ब्राह्मणानुमतेनैव दृष्ट्वा स्नात्वा च शुध्यति आचांतमनुगर्तं वा निशि स्नानं न वि
द्यते स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन च जातवेदाः अग्निः सोममार्गं आकाशम् ब्राह्मणानुमतेः स्नात्वाऽग्न्यादिकं स्पृष्ट्वा शुद्ध्यतीत्यर्थः
आचांतमाचमनम् अनुगर्तं जलाशयम् प्रविश्य निशि तूभयत्रयोज्यम् शंखः नित्यं नैमित्यकं चैव क्रियांगं मलकर्षणम् तीर्थाभावेपि
कर्तव्यमुष्णोदकपरोदकैः नित्यं प्रातःस्नानं परं नैमित्तिकं चांडालादिस्पर्शनिमित्तं क्रियांगं जपादिकर्माधिकारहेतुः मलकर्षणमभ्यं
गपूर्वकं ज्योतिःशास्त्रोक्तपुष्यस्नानादि काम्यं नद्याद्याधारकफलार्थं क्रियास्नानं चादाय शंखेन षोढा स्नानमुक्तम् अत्र क्रियास्नानए
वतेन धर्मा विहिताः प्रातःस्नाने यथाहनि तथा प्रातरित्यतिदेशाद्धर्माः अहरहः स्नाने कात्यायनेनोक्ताः स्नानांतराणि निमज्जनमात्ररू
पाणि धर्मसंबंधे प्रमाणाभावात् न चातिदेशः सर्वेषां सधर्मकत्वे विशेषोद्देशेन धर्मविधिवैफल्यात् न च गुणफले विशेषः तदभावात्
अपि च नैमित्तिके धर्माभाव उक्त एव काम्यपुष्यस्नानादि मलापकर्षणयोस्तु लौकिकयोर्न लौकिककर्मांगमिति तत्र क्षसूत्रे साधि
तत्वान्नालौकिकांगसंबंधः क्रियांगस्नाने त्वद्भिरेव शुद्ध्यभिधानाद्धर्माभावः अत एव हेलंतरप्रयुक्ते निमज्जनमात्रेपि क्रियास्नान
सपृथगनुष्ठानं हरिहरोपि क्रियास्नान प्रातःस्नानयोरेव धर्मानाह क्रियास्नानं किंत्विदं फलार्थितया कथितमप्यहरहःस्नानादभि
न्नं तत्रापि पापक्षयरूपस्य सत्वादित्ति भर्तृनयेन विशेषमाह एवं स्नानानुकल्पेपि श्रुतमात्रमनुष्ठेयं स्नानानुकल्पमाह योगियाज्ञव
ल्क्यः कालदोषादसामर्थ्यान्न शक्नोति यदा ह्यसौ तदा स्मृतान्ऋषिभ्यस्तु मंत्रैर्दृष्टं तु मार्जनम् शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणं
एतैश्चतुर्भिर्मंत्रैस्तु मंत्रस्नानमुदाहृतं कालदोषोऽतिवृष्ट्यादिः तेन रोगहीनोप्यतिवृष्ट्यादौ स्नानजनयितव्यरोगसंभावनायामाप्र

राम: १२

वं स्नानं न कुर्यात् असामर्थ्यमुत्पन्नरोगत्वम् अप्राप्तेः समुत्पन्ने स्नानमेव समाचरेत् स्नानमेवेति वारुणस्नानपरम् जावालिः अशिर
स्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः हारीतः आग्नेयं भस्मना स्नानमद्भिर्वारुणमुच्यते आ
पो हि ष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतं यत्तु सातपवर्षेण स्नानं दिव्यमिहोच्यते एतैस्तु मंत्रतः स्नात्वा तीर्थानां फलमाप्नुयात् मंत्रत इ
ति न पंचस्वपि स्नानेषु मंत्रविधायकं ब्राह्मवारुणयोर्मंत्रस्य प्राप्तत्वात् किं तु तदनुवादकमेव फलसंबंधपरत्वात् अत्र योगियाज्ञवल्
क्येन मृदालंभस्तु पार्थिवमिति मानसं विष्णुचिंतनमिति स्नानद्वयमधिकमुक्तम् कात्यायनः अथातो नित्यस्नानम् नद्यादौ मृद्गोमय
कुशतिलसुमनस आहरेत् सोदकांतं गत्वा शुचौ देशे प्रतिष्ठाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्य उरुं ह्यतिं
तोयमामंत्र्यावर्त्तयेद्ये ते शतमिति सुमित्रिया न इति योंजलिमादाय दुर्मित्रिया इति द्वेष्यं प्रति निषिंचेत् कटिं वस्त्युरू जंघे चरणौ करौ मृदा त्रि
स्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेद्गानि मृदेदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्ज्योन्म
ज्याचम्य गोमयेन विलिंपेन्मानस्तोक इति ततोभिषिंचेदिमं मे वरुण इति च नस्त्रिभिर्मीप उदुत्तमं मुंचेत्त्वऽवभृथेत्येतैश्चेतन्निमज्ज्योन्मज्ज्या
चम्य दर्भैः पावयेदापो हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामापो देवा द्रुपदादिव शन्नो देवीरपां रसमपो देवी पुनंतु मेति
नवभिश्चित्तपान्निर्मैस्त्रोंकारेण व्याहृतिभिर्गायत्र्यादावंते चांऽतर्जले घमर्षणं त्रिरावर्त्तयेद्द्रुपदां वा आयं गौरिति वा त्र्यृचं प्राणायामं वा सशिर
ओंमिति वा विष्णोर्वा स्मरणम् अथ तृतीयभागानंतर्य्यार्थं यतः स्नानेन न कर्माधिकारः अतो नित्यमहरहः स्नानं कर्त्तव्यमित्यर्थः यदा
ह विष्णुः स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि पवित्राणां तथा जप्ये दाने च विधिदर्शिते नन्वहरहः स्नानस्य नित्यत्वबलादेव कर्त्तव्यता

आ० द० १३

सिद्धौ अतइति हेत्वभिधानं व्यर्थं मैवं प्रासंगिकीकर्मोधिकारसिद्धिरित्येवंपरत्वात् नचनित्यस्नानं प्रातःस्नानं अस्नातो हि पुमान्नार्हो जपा
ग्निहवनादिषु प्रातःस्नानं तदर्थं तु नित्यस्नानमुदाहृतमिति शंखस्मरणादिति वाच्यं स्नानोत्तरं कात्यायनेन मध्यान्हकृत्यस्याभिधानात्
अतएवकामधेन्वादौ चतुर्थभागकृत्ये लिखितं मृदादौ कर्षणं नरैक विशेषः प्रयोगादेवाधिगंतव्यः अत्रयोगियाज्ञवल्क्येन त्रिधास्था
पितमृत्त्रमयाभ्यांमध्यमाधमोत्तमांगप्रक्षालनमुक्तं तत्कात्यायनसूत्रविरोधान्नग्राह्यम् एवमन्यदप्यधिकमत्रकल्पोक्तंसत्क्रमं आच
मननिमित्तपानेतुनसौत्रक्रमविरोधइति दर्शिनं शिष्टाकोपे कुशोपग्रहः कुशहस्तः उपगृह्यतेऽनेनेत्युपग्रहो हस्तयज्ञोपवीतीति पुरुषार्थ
विधिमात्रे यज्ञोपवीतित्वे यज्ञोपवीतीति द्वितीयवस्त्रधारणार्थमिति कात्यायनभाष्यं तदयुक्तं परिसंख्यापत्तेः तस्मात्कृत्स्नार्थश्रवणप्रक
रणात् तेन दैवादिन्हि नष्टेपि यज्ञोपवीते नद्यात्स्नानमिति सिध्यति एषमनियतकेशवेशः सर्वेषामुक्तशिखावर्जनमिति निषेधात्पुरुषार्थ
तः शिखाबंधनलाभे बद्धशिखीति कर्त्वंगता लाभार्थं द्वेष्यं प्रति निषिंचेत् द्वेष्यं बुद्धिस्था कृत्यय स्यां दिशि द्वेष्यस्तिष्ठति तस्यां क्षिपेदित्यर्थः नम
स्यनमस्कृत्य आलभेत्स्पृशेत् नद्यादावित्युपक्रमप्सूर्याभिमुख इत्यभिधानान्नद्यां स्नवत्सुचस्नायात्प्रतिस्रोतः स्थितो द्विजइति नरसिं
हपुराणे विषयान्तरे स्नात्वेति श्रवणात् पुनर्निमज्जनं निमज्योन्मज्येति चापरमिति मज्जनत्रयसिद्धिः अभिषिंचेत् हस्तेन शिरसिज
लं क्षिपेत् अंते चैतद्वक्ष्यमाणमार्जनांतेपि उक्तमंत्रकरणाभिषेककर्म कुर्यादित्यर्थः तथैव प्रकृतत्वात् न तत्तन्मंत्रजातं वक्ष्यमा
णमार्जनांते मार्जन एवेति कल्पना तत्राभिषेको मार्जनं च प्रत्यृचमेवेति लिंगात् चतसृभिस्तिसृभिरित्यादित्वेन कलप्राप्त्यर्थमेव न
तु मिलितविनियोगार्थमपि दर्भैरिति बहुत्वं त्रित्वपर्यवसितं कपिंजलन्यायात् पावयेन्मार्जनं कुर्यात् मार्जनमुदकबिंदूनां शिरसि निक्षे

एमः

पः चित्पतिर्मेतिप्रतिप्रतीकेनचित्पतिर्मापुनात्वित्यस्याच्छिद्रेणेतिवाक्यसहितस्यैकस्यैवमंत्रग्रहणंद्विलादिसंख्याया अश्रवणात् क
ल्पसूत्रेतुचित्पतिर्मेतिपावयतिप्रतिमंत्रमच्छिद्रेणेतिसर्वत्रेति दीक्षितपावनेविशेषश्रवणान्मंत्रत्रयग्रहणंश्रुतावपिप्रत्येकमेवमंत्र
पाठात् व्याहृतिभिस्तिसृभिर्लाघवात् प्रणवोभूर्भुवःस्वरित्यादौश्रवणाच्च गायत्र्यादौअन्तेच आपोहिष्ठेत्यादिमंत्रसाध्यमार्जनांग
तयागायत्र्यामार्जनमितियद्यपिप्रतिभातिसंनिहितसंबंधेनैवोपपत्तेः तथाप्यादावोंकारस्याहृत्यनुष्ठानदर्शनात्तत्संबंधेपिकात्या
यनाश्रयउन्नीयते प्राणायामःकर्तव्यइतिशेषः सशिरइतिक्रियाविशेषणत्वान्नपुंसकत्वमार्षत्वाच्च ॐमितिचानुवर्तयेदितिमव
हितसंबंधः आवर्तयेद्वाप्रणवमिति योगियाज्ञवल्क्यदर्शनात् विष्णोर्वास्मरणं कर्तव्यमितिशेषः गौतमः अंतर्जलेवाघमर्षणंत्रि
रावर्त्यसर्वस्मादेनसोमुच्यते मनुशंखयोगियाज्ञवल्क्याः यथाश्वमेधःक्रतुराट्सर्वपापप्रणोदनः तथाघमर्षणंसूक्तंसर्वपापप्र
णोदनं बृहस्पतिः द्रुपदादिवयोमंत्रोवेदेवाजसनेयिके अंतर्जलेत्रिरावर्त्यसर्वपापैःप्रमुच्यते अंतर्जलेऋग्ध्यादिकंस्मर्तव्यम् अवि
दितात्रुयःकुर्याद्याजनाध्यायनंजपम् होममंतर्जलादीनितस्यचाल्पफलंभवेदिति योगियाज्ञवल्क्यदर्शनात् अथकातीयस्ना
नप्रयोगः यथोक्तमृत्तिकामार्द्रगोमयंकुशान् कृष्णतिलान् सुरभिपुष्पाण्यादायसुमनानद्यादिकंगत्वातत्तीरे शुचौदेशेपृथक्
स्थापयेत् ततः पाणिपादंप्रक्षाल्य कुशोहस्तोबद्धशिखोउपवीतोआचामेत् ॐउरुंहिराजावरुणश्चकारसूर्यायपंथामन्वेतवाउ
अपदेपादाप्रतिधातवे करुतापवक्ताहृदयाविधश्चित् नमोवरुणायाभिष्ठितोवरुणस्यपाशइतितोयमामंत्र ॐयेतेशतंवरुणये
सहस्रंयज्ञियाः पाशावितताः महांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्का इतित्रिःप्रदक्षिणंजलमावर्तयेत् ततः

ॐ सुमित्रिया न आप ओषधयः संतु इति जलांजलिमादाय ॐ दुर्मित्रियास्तस्मै संतु योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति द्वेष्ये प्रतिनिषिंचेत् ततः कटिवस्त्रं रूजंघे चरणौ करौ प्रत्येकं मृत्तोयाभ्यां त्रिस्त्रिः प्रक्षाल्य एकं पादं जलेऽपरं च स्थले निधाय आचामेत् ततः उदकं नमस्कृत्य ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे इति मृत्तिकयांगानि संस्पृश्य नाभिमात्रजलं प्रविश्य ॐ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु विश्वं हि रिप्रं प्रवहंति देवीरिति मंत्रेण सूर्याभिमुखो निमज्जेत् ततः स्नात्वा ॐ उदिदाभ्यः शुचिरा पूत एमि इति निमज्ज्योन्मज्ज्याचम्य ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान्रुद्र भामिनो वधीर्हविष्मंतः सदमित्त्वा हवामहे इति मंत्रेण गोमयेनांगानि विलिंपेत् ततः ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ॐ तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॐ स त्वन्नो अग्नेऽवमो भवतीनेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि ॐ मापो मौषधीर्हिंसीर्द्धाम्नो धाम्नो राजंस्ततो वरुण नो मुंच यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॐ मुंचंतु मा शपथ्यादथो वरुण्यादुत अथो यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषात् ॐ अवभृथ निचुंपुण निचेरुरसि निचुंपुण अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि इत्यष्टभिर्मंत्रैर्हस्तेन प्रत्येकं शिरसि जलं प्रक्षिपेत् ततो वहति जले प्रवाहाभिमुखः स्थिरे सूर्याभिमुखो मौनी शरवत्त्रिर्निमज्जेत् तत आचम्य

ॐकारव्याहृतिगायत्रीभिरापोहिष्ठेत्यादितिसृभिः ॐइदमापः प्रवहतावद्यंचमलंचयत् यच्चाभिदुद्रोहानृतंयच्चशेपे अभिरुहं आपो
मातस्मादेनसः पवमानश्चमुंचतु ॐहविष्मतीरिमाऽआपोहविष्मां अविवासति हविष्मांदेवो अध्वरोहविष्मांअस्तुसूर्यः ॐदेवीरापो
अपान्नपाद्योवऊर्मिर्हविष्यइन्द्रियावान्मदिंतमः तंदेवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषांभागस्थस्वाहा ॐकार्षिरसिसमुद्रस्यत्वाक्षित्या
उन्नयामिसमापो अद्भिरग्मतसमोषधीभिरोषधीः ॐआपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वाश्चितानाः याभिर्मित्रावरुणावभ्य
षिंचन्याभिरिंद्रमनयन्नत्यरातीः ॐद्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव पूतंपवित्रेणेवाज्यमापः शुंधंतुमैनसः ॐशन्नोदेवीर
भिष्टयआपोभवंतुपीतये शंय्योरभिस्रवंतुनः ॐअपाꣳरसमुद्वयसꣳसूर्येसंतꣳसमाहितं अपाꣳरसस्ययोरसस्तंवोगृण्हाम्युत्त
मं ॐअपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॐपुनंतुमापितरःसोम्यासःपुनं
तुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषा ॐपुनंतुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॐ
अग्नआयूꣳषिपवसआसुवोर्जमिषंचनः आरेबाधस्वदुच्छुनां ॐपुनंतुमादेवजनाः पुनंतुमनसाधियः पुनंतुविश्वाभूतानिजात
वेदः पुनीहिमा ॐपवित्रेणपुनीहिमा शुक्रेणदेवदीद्यत् अग्नेक्रत्वाक्रतूꣳरनु ॐयत्तेपवित्रमर्चिष्यग्नेविततमंतरा ब्रह्मतेनपुनातुमा
ॐपवमानःसोअद्यनः पवित्रेणविचर्षणिः यःपोतासपुनातुमा ... मांपुनीहिविश्वतः ॐवैश्वदेवीपुनतीदेव्यागाद्यस्यामिमावह्व्यस्तन्वोवीतपृष्ठाः तयामदंतः
सधमादेषुवयꣳस्यामपतयोरयीणाम् ॐचित्पतिर्मापुनातुवाक्पतिर्मापुनातुदेवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मि
भिः तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयमितिप्रत्येकंमंत्रैः पुनरोंकारव्याहृतिगायत्रीभिः कुशत्रयेणमार्जनंकुर्यात्

आ॰
द॰
१५

ततः पूर्ववत् इमंमेगङ्गेवरुणइत्यादिमंत्रैः शिरसिजलंनिक्षिपेत् ततऋष्यादिकंस्मृत्वामग्नोघमर्षणंद्रुपदांवाआयंगौरितिवाऋचंवात्रि
रावर्तयेत् वक्ष्यमाणमंत्रैस्त्रिरावृत्तप्राणायामंवाकुर्यात् ॐकारंवात्रिरावर्तयेत् विष्णुंवास्मरेत् योगियाज्ञवल्क्यः आचांतःपुनराचामे
न्मंत्रवत्स्नानभोजने मंत्रमाह द्रुपदांवात्रिरावर्त्यतथाचैवाघमर्षणं गायत्रींवात्रिरावर्त्यमहाव्याहृतिभिस्तथा सोपांशुप्रणवेनापि
आपःपीताअघापहाः एतच्चाचमनंमज्जनानंतरंमार्जनात्प्राक् आचम्याप्सुमज्ज्यचाप्यानंत्रिराचम्यशनैरसून् अथोपतिष्ठेदादित्य
मित्यग्रेआम्नायेतत्तेनेनमार्जनाभिधानात् यदिस्नानापतेयमप्रापयंस्यात्तदीक्षस्नानविधेः प्राक्कमलस्नानंकर्तव्यम् यदाह तूष्णी
मेवावगाहेत यदिस्यादशुचिर्नरः आचम्यचपुनःपश्चात्स्नानंविधिवदाचरेदिति अथपद्मपुराणीयस्नानविधिः तत्रपद्मपुराणे नैर्म
ल्यंभावशुद्धिश्चविनास्नानंनजायते तस्मान्मनोविशुद्ध्यर्थंस्नानमादौविधीयते अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत् तीर्थंप्रकल्प
येद्विद्वान्मूलमंत्रेणमंत्रवित् ॐनमोनारायणायेतिमूलमंत्रउदाहृतः दर्भपाणिस्तुविधिनाह्याचांतःप्रयतःशुचिः चतुर्हस्तसमायुक्तंच
तुरस्रंसमंततः प्रकल्प्यावाहयेद्गंगामेभिर्मंत्रैर्विचक्षणः ॐविष्णोःपादप्रसूतासिवैष्णवीविष्णुपूजिता पाहिनस्तेनसस्तस्मादाजन्ममर
णांतिकात् विष्णुपादार्घसंभूतेगंगेत्रिपथगामिनी धर्मद्रवेतिविख्यातापापंमेहरजाह्नवि तिस्रःकोट्योर्धकोटीचतीर्थानांवायुरब्र
वीत् दिविभुव्यंतरिक्षेचतानितेसंतिजाह्नवि नंदिनीत्येवतेनामदेवेषुनलिनीतिच वृंदापृथ्वीचसुभगाविश्वकायाशिवासिता विद्याधरीसु
प्रसन्नातथालोकप्रसाधनी क्षेम्याचजाह्नवीचैवशांताशांतिप्रदायिनी एतानिपुण्यनामानिस्नानकालेप्रकीर्तयेत् भवेत्सन्निहितात
त्रगंगात्रिपथगामिनी सप्तवाराभिजप्तेनकरसंपुटयोजितं मूर्ध्निकुर्याज्जलंभूयस्त्रिश्चतुःपंचसप्तवा स्नानंकुर्यान्मृदातद्वन्मंत्रंचवि

एमः
१५

धानतः अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे मृत्तिके हर मे पापं यन्मया दुःकृतं कृतम् उद्धृतासि वराहेण कृष्णेन शतबाहुना आरुह्य मम गा
त्राणि सर्वं पापं प्रमोहय नमस्ते सर्वलोकानां प्रभवारिणि सुव्रते आदौ संध्यानर्पणादीनामिति शेषः सप्तवाराभिजप्तेन पूर्वोक्तमूलमंत्रेण एक
वचननिर्देशात् मूलमंत्रत्वेन निर्देशस्य सार्थकत्वाच्च नेतरभिर्मंत्रैरित्युपक्रम्य कथिता मंत्राणां ग्राहकदूनिभ्रमः कार्यः स्नानं कुर्यादिति अग्नि
मंत्रेण मृदमामंत्र्य तया गात्राण्यालिप्य मज्जनं कुर्यादित्यर्थः अयं च स्नानविधिः सर्वशाखिसाधारणः सर्ववर्णसाधारणश्च संकोचे प्रमाणा
भावात् पुराणश्रवणे सर्वाधिकारश्रवणाच्च अनधीतवेदं प्रति वायमेव स्नानविधिः प्रशस्तः वेदमंत्रशून्यत्वात् विष्णुः स्नान एव सोष्णीषे धौ
तवाससी बिभृयात् उष्णीषधारणं शिरोजलप्रच्यवार्थमाचमनात्प्राक् पराशरः स्नात्वा निवस्य वाससी अन्यज्जंघे प्रक्षालयेन्मृदा अपवित्रीकृते
वितु कौपीनं च्युतवारिणा कौपीनमधोवस्त्रं योगियाज्ञवल्क्यः स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षाल
येत्तथा अभावे धौतवस्त्रस्य शाणक्षौमाविकानि च कुतपं योगपट्टं च द्विवासा येन वै भवेत् कुतपो नेपालकंबलः जाबालिः नार्द्रमेकं च वसनं परि
दध्यात्कथंचन अत्र सदातननिषिधबलात् रुक्षार्थता नरसिंहपुराणे नरक्तमुल्वणं वासो न नीलं च प्रशस्यते मलाक्तं च दशाहीनं वर्जयेदंबरं बुधः
ततः प्रक्षालयेत्पादौ मृत्तोयेन विचक्षणः उल्वणमत्यंतं एतच्च रक्तविशेषणं तेनात्यंतरक्तमित्यर्थः उल्वणमं चलाणिनि केचित् अप्रक्षालितः नवा
सा विधुनुयात् नोत्तरीयविपर्यासं कुर्यात् विष्णुः स्नातः शिरो नावधुनीत नांगेभ्यस्तोयमुद्धरेत् न तैलवरोस्पृशेत् नाप्रक्षालितं पूर्वधृतं वाससि बि
भृयात् नम्लेच्छांत्यजपतितैः सह संभाषं कुर्यात् तैलं च वशा च तैलवशे मार्कंडेयपुराणे संप्रमृज्यान्न च स्नातो गात्राण्यंबरपाणिना अंतरं स्नान
वस्त्रं न स्नानशाट्येति विष्णुपुराणपाठात् एवं च न स्नातो गात्रमवमृज्यादिति हारीतोपि स्नानशाट्या पाणिना च विशेषणीयः एवं च तमर्थं प्रतिमार्ज्ज

आ० द० १६

नमात्राभावोऽसमर्थं प्रति पाणिशाटीमार्जनाभाववदिति हरिहरोक्तमश्रद्धेयम् सांख्यायनगृह्ये आप्लुत्याप्युदकेन पट्टसूत्रमाच्छादयेत् अशुद्धकोऽनु
द्धृतोदकः एषोपि पाणिवस्त्राभ्यामुद्धरणेनिषेधः कुलविशेषनियतो वा गृह्योक्तत्वात् अत्र शंखः उदकस्याप्रदानाद्धि स्नानशाटीं न पीडयेत् अत्र
विष्णुः याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति नित्यस्नानेन पूयंते येपि पापकृतो नराः योगियाज्ञवल्क्यः अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रति
ग्रहात् रहस्याचरितात्पापान्मुच्यते स्नानमाचरेत् पापेभ्यः पतितादिभ्यः छंदोगपरिशिष्टे संध्यालोपस्य चाकर्ता स्नानशीलश्च यः सदा तद्दोषानो
पसर्पन्ति गरुत्मन्तमिवोरगाः अथ संध्योपासनं तत्र छंदोगपरिशिष्टे अत ऊर्ध्वं प्रवक्ष्यामि संध्योपासनिकं विधिं अनर्हः कर्मणां विप्रः संध्याहीनो
यतः स्मृतः संध्येति वक्ष्यमाणप्राणायामादिकर्मनाम उपासनं सेवनमनुष्ठानमिति यावत् आचारसेवनीत्यादौ दर्शनात् अत एव संध्याहीनानां संध्यो
पासितेति तुल्यवत्प्रयोगः अथवा ब्रह्मणोपासिता संध्या विष्णुना शंकरेण च कस्तां नोपासयेद्देवीं सिद्धिकामो द्विजोत्तम इति योगियाज्ञवल्क्येन
देवीत्वेन कीर्तनात्संध्यारूपाया देवताया वक्ष्यमाणप्राणायामादिनोपासनमाराधनं संध्योपासनं सिद्धिरत्र मोक्षः अनर्हः कर्मणामित्यादिना सं
ध्योत्तरकर्मणि कृतसंध्यस्याधिकार इत्युक्तं अथवा चिरंतनसंध्यात्यागिनः पतितस्येव द्विजातिकर्मानधिकारः नानुतिष्ठति यः पूर्वां नोपास्ते य
श्च पश्चिमां स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः इति मनुदर्शनात् विष्णुपुराणे सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते अन्यत्र सूतकाशौच
विभ्रमातुरभीतितः विभ्रमश्चित्तविक्षेपः मेघादिना कालाज्ञानमित्यन्ये यद्यप्यत्र मध्याह्नसंध्या नोक्ता तथाप्यनन्तं संध्यात्रयं प्रोक्तं ब्राह्मण्यं यद
धिष्ठितं यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते इति छंदोगपरिशिष्टात् संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदेति योगियाज्ञवल्क्याच्च सापि वोद्ध
व्या एतेन संध्यात्रये नित्याधिकारो दर्शितः पापक्षयकामाधिकारोप्यत्र यदाह याज्ञवल्क्यः दिवा वा यदि वा रात्रौ यदज्ञानकृतं भवेत् त्रिकालसंध्याक

रणात्तत्सर्वं च प्रणश्यति सततं संध्यानिष्णातस्य फलांतरमप्याह यमः संध्यामुपासते ये तु सततं शंसितव्रताः विधूतपापास्ते यांति ब्रह्मलोकं सना
तनं संध्याद्वये प्रत्येकमपि पापक्षयमाह मनुः पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति पश्चिमां तु समासीनो मलं हंति दिवाकृतं नन्वेवं केवलमध्या
ह्नसंध्यायां किं प्रमाणं मैवं उत्तीर्य धौतवाससी परिधाय मृदा रुक्करं प्रक्षाल्याचम्य त्रिरायम्यासूनित्यादिना कात्यायनेन मध्याह्नस्नानोत्तरं नरसिंह
पुराणादौ च केवलायाअपि वक्ष्यमाणत्वात् एवं च संध्यात्रये प्रत्येकमपि कर्तव्यतायां दर्शितत्वादेकसंध्यालोपेअपराणि न कर्तव्या मिलितेनोचरता
दधिकारस्येति दुर्मतिः देशमाह तुः शंखलिखितौ सव्रती वहिः संध्यामुपासीत सव्रती ब्रह्मचारी व्रतयुक्ताध्ययनशीलत्वात् वहिर्ग्रामात् नैनं ग्रामे
अभिनिम्लोचेत् सूर्यो नाभ्युदियात् क्वचिद्दिनमनुदर्शनात् एनं ब्रह्मचारिणमभिनिम्लोचेत् अस्तयायात् गुणफलमाह शातातपः अनृतं मद्यगंधं च
दिवामैथुनमेव च पुनाति वृषलस्यान्नं वहिः संध्या ह्युपासिता गृहेषु प्राकृता संध्या गोष्ठे शतगुणा स्मृता नदीषु शतसाहस्रो ह्यनंता शिवसंनिधौ
प्राकृतो एकगुणा व्यासः वहिः संध्या दशगुणा गोष्ठप्रस्रवणादिषु स्नानतीर्थे शतगुणा साहस्री जाह्नवीजले संध्याकालपरिमाणमाह योगिया
ज्ञवल्क्यः ह्रासवृद्धी हि सततं दिवसानां यथाक्रमम् संध्या मुहूर्तमात्रं तु ह्रासे वृद्धौ च सा समा सर्वेष्वृतुषु प्रातः संध्या सायंसंध्या च दंडद्वयमेव भवती
ति यथा संधौ संध्यामुपासीत नास्तगे नोद्गते रवौ संधा वितिपूर्वं विधानात् नास्तगइति संधिरूपमुहूर्तादूर्ध्वं निषेधानुवादकं सति संभवे सादित्यामा
रंभे दिसे व परं वा उपक्रमकालमाह संवर्तः प्रातः संध्यां सनक्षत्रामुपासीत यथाविधि सादित्यां पश्चिमां संध्यामर्धास्तमितभास्करां आदित्यपदमस
मयप्राप्त्यपूर्णं बिंबपरं समाप्तिकालमाह याज्ञवल्क्यः जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् संध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् प्रत्य
क् पश्चिमामभिमुखः प्राक् पूर्वाभिमुखः आसीनेति सायंजपे आसीनतार्थम् तिष्ठेदिति प्रातर्जपे ऊर्ध्वत्वार्थम् मध्याह्नसंध्याजपे पूर्वोक्तेनैव तिष्ठेदुदयता

आ० द० १७

पूर्वां मध्यमामपि शक्तित इति छंदोगपरिशिष्टात् स्नानोनंतरं तमध्यान्हसंध्यायाः प्रागेवोक्तं मनुः ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः प्रज्ञां य
शश्च कीर्तिं च ब्रह्मवर्चसमेव च दीर्घसंध्यत्वं प्रातरुदयावधि सायं च नक्षत्रावधि जपेत् एतत्त्रिगुणफलमिति वाक्यांतरेपि सूर्यनक्षत्रयोरेवा
वधित्वं तत्फलार्थमेकमूलत्वानुरोधात् अथवा सूर्यनक्षत्रयोः प्राक्कालोपि नित्यजपो गतयावोध्यते न तु तत्कालस्य सावित्रीजपेनाभिव्या
प्तिरित्यत्रापि तात्पर्यं उभयपक्षेपि कामनाविरहे विहितदशादिसंख्यादरः कामिनस्तु दीर्घसंध्यात्वएव श्रवणाज्जपेन कालव्याप्तावेव तात्पर्यं
अत्र च जपदीर्घत्वेन दीर्घसंध्याभिधानात् जपेन संध्याकर्मसमाप्तिरिति मंतव्यम् उभे संध्ये जपन्नप्यमुपासीत यथाविधि इत्यादिनानाक्ये
षु सावित्रीजपस्य संध्यांतर्गमः स्फुटः एवमजपे प्रत्यवायश्रवणं तदभिप्रायमेव फलश्रुतेतु सावित्रीजपः पृथगपीति अघमर्षणसूक्तस्या
पो हिष्ठेति त्रिऋचस्य द्रुपदायाश्च ऋष्यादिकमुक्तं याज्ञवल्क्यः एवं ज्ञात्वा तु मंत्राणां प्रयोगं वै द्विजोत्तमाः संध्यामुपासयेद्यद्वद्यथावंतं
निबोधत अत्राहुः सर्वेषामेव मंत्राणामादौ ऋष्यादिकं स्मृत्वा पश्चात्संध्याप्रयोगस्तदयुक्तं एवं ह्युपगभूतेन ऋष्यादिस्मरणेन सह सर्वेषामेव मंत्रा
णामानंतर्यस्यापागतं वाध्यते ॐकारस्य सप्तव्याहृतीनां सावित्र्याः शिरसश्च ऋष्यादिकं स्थानान्तरे याज्ञवल्क्येन कथितमिति कथनं तत्पू
र्वभावः किंच अघमर्षणसूक्तस्य ऋष्यादिकं प्रथममुक्तं तदेव प्रथमं स्यात् तस्माज्ज्ञात्वेति प्रयोगाद्बहिर्ज्ञानं प्रयोगकाले सोकर्यार्थे अथवा ज्ञा
त्वा पासयेदिति प्रत्येकमभिसंबध्यते तेन तत्तन्मंत्रस्य ऋष्यादिकं तत्तन्मंत्रप्रयोगात्प्राक् ज्ञातव्यमिति सिध्यति प्रणवव्याहृतिसावित्रीशिरसां चमि
लितानामेव प्राणायामे विनियोग इति तेषां मिलितानामेव ऋष्यादिकं स्मृत्वा प्राणायामः ॐकारस्याग्निर्वर्णे कथनं सावित्र्याश्चाग्निर्मुखं कथनं स्तु
तिर्विनियोगाभावात् आर्षं छंदो दैवतं च विनियोगस्तथैव च वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः इत्यादिना नास्थानेषु चतुर्णामेवाभिधानात्॥

एमः १२

अत्रऋष्यादिस्मरणेपाठिकएवक्रमोग्राह्यःस्यानांतरेषुपप्नेनैवक्रमेणऋष्यादिचतुष्ककथनं एवंपंचविधंयोगंजप्यकालेष्वनुस्मरेत् होमेवांत
र्जलेयोगेस्वाध्यायेयाजनेतथेति शतपथब्राह्मणांतर्भावेणपंचविधत्वप्रकारांतरमधिकफलार्थंवा इदंचऋष्यादिस्मरणंयत्रमंत्रेप्रामाणिकंत
तःप्राकप्रयोगेएवकर्तव्यं संध्योपक्रमेव्यासः स्मृत्वोंकारंचगायत्रींनिवध्नीयाच्छिखांततःपुनराचम्यहृदयंनाभिंस्कंधौचसंस्पृशेत् यदिनस्मिन्काले
मुक्तशिखःस्यात्तदानेनमंत्रेणशिखांवध्वाआचामेदित्यर्थः नतुसमंत्रकत्वार्थंपूर्ववद्धापिशिखामोचनीयेतिभ्रमःकार्यः छंदोगपरिशिष्टे सव्यपाणौ
कुशान्कृत्वाकुर्यादाचमनक्रियां सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकः सोपग्रहःकुशान्कृत्वेतिपूर्वोक्तकुशत्रयसमीपे अग्रिमकर्मोपयुक्ताः
कुशाधर्तव्याइत्युक्तम् तत्रकुशस्याकांक्षितत्वात् उपगृह्यतइत्युपग्रहइतिव्युत्पत्तिसंभवाच्च अथपवित्रं अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच प्रा
देशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् अनेनैवलक्षितम् हस्ताःप्रचरणीयाःस्युःकुशाद्दीर्घास्तुवर्हिषः दर्भाःपवित्रमित्युक्तमतःसंध्यादिकर्मणि
अस्यार्थःयतःप्रचरणदोहस्तादिविधिस्ततःसंध्यादौविशेषविध्यभावाद्दर्भमात्रमेवांगंनतुपवित्रलक्षणमेतत् पूर्वलक्षणवाधात् अतइत्यन्य
याद्यांकुभेदापतेश्च अत्रचाचमनात्प्रागेवपवित्रधारणं आचम्यप्रयतोनित्यंपवित्रेणद्विजोत्तमः नोच्छिष्टस्तुभवेत्तत्रभुक्तशेषंतुवर्जयेदिति लघुहा
रीतदर्शनाद्दन्यत्रजपापयुक्तकुशत्रयधारणमपिदक्षिणकरेपवित्रधारणावसरएवकुर्वीत अविरुद्धंचैतत् लघुहारीतःदर्भहीनानुयासंध्यायच्च
दानंविनोदकं असंख्यातंचयज्जप्तंतत्सर्वंनिःफलंभवेत् योगियाज्ञवल्क्यः ऐशान्याभिमुखोभूत्वाशुचिःप्रयतमानसः आचांतःपुनराचामेत्दृत्त
मित्यभिमंत्र्यच ओंतरंशुद्धातिह्येवमन्नपानमलीकृतम् तथा पूर्वासंध्यातुगायत्रीसावित्रीमध्यमास्मृता याभवेत्पश्चिमासंध्यासातुदेवीसरस्व
ती रक्ताभवतिगायत्रीसावित्रीशुक्लवर्णिका कृष्णासरस्वतीज्ञेयासंध्यात्रयमुदाहृतं कामधेन्वादौ श्वेताभवतिगायत्रीसावित्रीरक्तवर्णिकेति॥

क्वचित्पाठः एतच्च संध्यारूपकथनं ध्यानार्थं स्तुतिमात्रपरं वा गायत्री च कालत्रयेपि शुक्लवर्णैव ध्येयेति वक्ष्यते या संध्या सा च गायत्री त्रिधा भूत्वा
व्यवस्थितेति अभेदाभिधानस्तुतिः पारमार्थिकेप्यभेदे जपोपक्रमे शुक्लाया एव ध्यानं बृहस्पतिः बद्ध्वासनं नियम्य स्वं स्मृत्वा ऋष्यादिकं त
तः संनिमीलितदृङ्मौनी प्राणायामान्समभ्यसेत् आसनं पद्ममर्द्धासनं चापि तथा स्वस्तिकमिति वायुपुराणोक्तम् स्वमात्मानं नियम्यासने
निपीठे प्राणायामपदं मंत्रपरं अत्र छंदोगपरिशिष्टे रक्षां तेवारिणात्मानं परिक्षिप्य समंततः रक्षाकार्येति शेषः अंतःशब्दस्यादावपिशक्तत्वा
त् शिष्टाचारानुरोधात् प्राणायामादाविदं रक्षाकार्येत्यर्थः कामधेनौ तु प्राणायामानंतरमेव लिखितं शंखवसिष्ठांगिरोबृहस्पतिपैठीनसिबौ
धायनाः सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते व्याहृतं च छंदोगपरिशिष्टे भूराद्यास्तिस्र एवैता
महाव्याहृतयोऽव्ययाः महर्जनस्तपः सत्यं गायत्री च शिरस्तथा आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरः प्रतिप्रतीकं प्रणवमुच्चारये
देते च शिरसस्तथा एता एतां सहानेन तथैभिर्दशभिः सह त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते प्रतिप्रतीकं सप्तव्याहृतीनां गायत्र्याः शिर
सश्चादावित्यर्थः एवं शिरोंतं प्रणवमादाय दश भवंति एता व्याहृतीः एतां गायत्रीं अनेन शिरसा एभिः प्रणवैः आयतप्राणो नियतवातः नियमा
श्च पूरके आदानमेव कुंभके धारणमेव रेचके त्याग एवेत्येवंरूपः योगियाज्ञवल्क्यः पूरकैः रेचककुंभकैः प्राणायामस्त्रिलक्षणो ज्ञेयः त्रिल
क्षणस्त्रिविधः एतच्च योगियाज्ञवल्क्य एव पौर्वापर्यपरामर्शाद्व्युत्क्रमम् एवं च प्रत्येकमेव प्राणायामत्वात्प्रत्येकमेवात्र प्रयुक्तो मंत्रपाठः एतावते
व प्राणायामत्रयसिद्धिरिति अत एव तेनांतः शुद्ध्यतीति त्रिभिरित्युपसंहारः आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेदिति व्यासोक्तेः नवधा
भ्यासः पक्षांतरं त्रिविधं केचिदिच्छंतीति तथैव नवधा परे इत्यनेनाप्यभिधानात् तथा हि नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते कुंभको

निश्चलश्वासो रिच्यमानस्तु रेचकः नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितं चतुर्भुजं महात्मानं पूरकेणैव चिंतयेत् कुंभकेन हृदिस्थाने ध्या
येच्च कमलासनम् ब्राह्मणं रक्तगौरांगं चतुर्वक्त्रं पितामहम् रेचकेनेश्वरं ध्यायेल्ललाटस्थं महेश्वरं शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं पूरके
णेत्यादौ लत्तौ पासन्नम्यर्थे कालोपलक्षणत्वात् गौरसर्वांगपाठे गौरपदं रक्तपरं नानार्थत्वात् तथा च व्यासः रक्तं प्रजापतिं ध्यायेदिति मात्राभेदान्मृ
दुमध्यमोत्तमत्वं योगिप्राणायामविषयं संध्याप्राणायामकालस्य मंत्रपाठेनैवावच्छेदात् पूरकरेचककुंभकैर्मिलित्वैकः प्राणायामः कुंभकमात्र एव
नु मंत्रपाठ इत्याद्यसत् पक्षनिरासविस्तरश्छंदोगाह्निके नु संधेयः योगियाज्ञवल्क्यः प्राणसंयमनं कृत्वा आचामेत्प्रयतोपि सन् आंतरं विद्यते यस्मा
त्तस्मादाचमनं स्मृतम् हेतुनिर्देशस्य सर्वस्मिन्नेव प्राणायामे आचमनप्राप्त्यर्थः अत्र हलायुधनिबंधे तु प्रक्षाल्य तेन पाणिपादौ ऽपआचम्य अग्निश्च मा
मन्युश्चेति सायमपः पीत्वा सूर्यश्च मामन्युश्चेति प्रातरिति बौधायनवाक्यमाचमनमंत्रे प्रमाणमुक्तम् एतच्च वाक्यं संध्यात्राक्कालीनप्रोक्षणात् प्राक्श्रु
ततस्मात्प्राणायामानन्तरमाचमने मंत्रसंबंधे आचार एव प्रमाणं अत एव मध्याह्नेपि मंत्र इति केचित् प्रातः सूर्यश्चेमेत्युक्त्वा सायमग्निश्चेमेति च आपः
पुनंतु मध्याह्ने कुर्यादाचमनं ततः इति एजाद्युल्लिखितं मैत्रायणीयगृह्यपरिशिष्टवचनं प्रमाणमाहुः प्राणायामानंतरमापोहिष्ठेत्यादिना मार्जनमाह या
ज्ञवल्क्यः प्राणानायम्य संप्रोक्ष्य ऋचेनाब्दैवतेन तु इति विभागमाह व्यासः विप्रुषोष्टौ क्षिपेदूर्ध्वं अधो यस्य क्षयाय चेति प्रकारमाह छंदोगपरिशिष्टे
शिरसो मार्जनं कुर्यात्कुशैः सोदकविंदुभिरिति पतुयोगियाज्ञवल्क्येन साद्वयं चाधः प्रक्षिप्य साद्वयोर्ध्वं तु प्रक्षिपेदिति विभाग उक्तः सप्राचीनमार्जने॥
एवं संमार्जनं कृत्वा वाह्यशुद्ध्यर्थकारणम् अथाभ्यंतरशुद्ध्यर्थं प्राणायामान्समभ्यसेदिति उपसंहारात् एतच्च संमार्जनं स्नानासामर्थ्ये संध्यानुकूल
शौचार्थमेव वाह्यशुद्ध्यर्थकारणमिति श्रवणात् अधिकफलार्थं वा अत एव बहुभिरनुष्ठानमनावश्यकत्वात् कल्पांतरं चेति परिभाव्यं प्राणायाम

नंतरं मार्जनं संध्यांतर्गतमिति दर्शितमेव अयमपि संध्यामंत्रक्रमे प्राणायाममंत्रानंतरं मार्जनमंत्रमाह ॐकारव्याहृतीः सप्त गायत्रीं शिरस्तथा सह
आपोहिष्ठा ऋचस्तिस्रः सूक्तं चैवाघमर्षणमिति अत्र यद्यप्यापोहिष्ठानंतरमघमर्षणमुक्तं तथापि मध्ये द्रुपदा वोढ्वा सर्वत्र मार्जनकर्मअलिंगानामुदाहृतं
इत्यनंतरं द्रुपदा ऋच्यादिकमुक्त्वा आपः पुण्याः समादाय त्रिः पठेद्द्रुपदामृचं ततोयमूर्ध्नि विन्यस्य सर्वपापैः प्रमुच्यते इति द्रुपदाप्रयोगमुक्त्वा एवं ज्ञात्वा
तु मंत्राणामित्यादिना संध्याभिधानात् एवं चोक्त एव द्रुपदाप्रयोगः संध्यायां ग्राह्यः प्रकारांतरे प्रमाणाभावात् अघमर्षणप्रयोगस्तु छंदोगपरिशिष्टे
दर्शितः करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च जपेदनायतासु वा त्रिः सकृद्वाघमर्षणमिति अनायतासु वेति विकल्पबलादायतासु नायता
सुएपि आयतासु पक्षे सकृत् अनायतासु पक्षे त्रिरिति व्यवस्थितविकल्पः शंखः उपस्पृश्य ततः पश्चान्मंत्रेणानेन धर्मतः अन्तश्चरसि भूतेषु गु
हायां विश्वतोमुखः त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोमृतमिति प्राणायामानंतरमाचमनविधानादायतासु पक्षे शंखोक्तवचनमुपसंहर्तव्य
मिति केचित् एतच्चाचमनं मार्जनानंतरं श्रुतमपि ऋष्यंतरोक्ताघमर्षणानंतरमनुष्ठेयम् शंखेनाप्येतदनंतरं सूर्यांजलिदानाभिधानादुपस्थाना
त्प्राक् छंदोगपरिशिष्टे उत्थायार्कं प्रति प्रोहेत्त्रिकेणांजलिमंभसः प्रोहेत् क्षिपेत् त्रिकेण प्रणवो भूर्भुवः स्वश्च गायत्री च तत्तोयकाद्दृत्यनेनैव प्रागु
क्तेन अंजलिमित्येकत्वस्य विवक्षितत्वादंजलित्रयदानमशुद्धम् कात्यायनश्च पुष्पाण्यंबु मिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षेत् उद्व
यं तत उदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति जपरूपमुपस्थानम् अत्र मध्याह्नसंध्यांजलौ सजलपुष्पश्रवणात् विष्णुपुराणादौ तोयमा
त्रश्रवणमुपलक्षणं प्रातःसायंविषयं वा तथा च तैत्तिरीयश्रुतिः ब्रह्मवादिनः सूर्याभिमुखाः संध्यायां गायत्र्याभिमंत्रिता अप ऊर्ध्वमुत्क्षिपंति ता ए
ता आपो वज्रीभूत्वा तानि रक्षांसि मंदेहारुणे द्वीपे प्रक्षिपंति यत्प्रदक्षिणं प्रक्रामंति तेन पाप्मानमवधुन्वंति उद्यंतमस्तं यांतमादित्यमभिध्यायन्ब्रा

स्नणो विद्वांन्सकलंभद्रमश्नुते इति तथाचोर्ध्ववाहुविधानात दसंसक्तपार्ष्णिर्वा एकपादर्धपादपि कुर्यात्कृतांजलिर्वापि ऊर्ध्ववाहुरथापि वाइ
तिकं दोगपरिशिष्टीयमुपस्थाने कृतांजलित्वं सायंप्रातर्विषयमेव उदीक्षेतेति सूर्याभिमुखत्वे तात्पर्यं तेन मेघादिछन्नेपि संमुखमुपतिष्ठेदु
पस्थायेत्युपसंहाराच्च गायत्र्याश्च जपित्वयेवोपस्थानं मंत्रकरणकं हि देवताज्ञानमुपस्थानं तच्च जपेपि संभवति अनर्थपरत्वे वाच्चारणे जपप
दमिति प्रायिकम् अन्यत्रार्थपरत्वे प्रमाणाभावात् अत एव यथाशक्तीति नानाजपसंख्यासंभवात् सुक्तं चैतत् पृथक्कात्यायनेन जपानभि
धानात् ऋत्यंतरसंवादाच्चेति याज्ञवल्क्यः स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जप इति मार्जनप्रा
णसंयमयोः पाठक्रमो न ग्राह्यः प्राणायामादेः संध्याप्रयोगोपलक्षणार्थत्वात् एवं कात्यायनेनापि प्राणायामानंतरमुपस्थानाभिधानं संक्षे
पात् गायत्रीजपे योगियाज्ञवल्क्यः प्रणवो भूर्भुवःस्वश्च सांगानि हृदयादयः त्रिरेवं तु ततः पश्चादार्षं छंदश्च दैवतं विनियोगस्तथारूपं ध्या
तव्यं क्रमशस्तु वै रूपमाह श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता आदित्यमंडलस्था च ब्रह्मलोकग
ताथवा अक्षसूत्रधरां देवीं पद्मासनगतां शुभा आवाह्य यजुषानेन तेजोसीति विधानतः तत्रावाह्य जपित्वा च नमस्कृत्य विसर्जयेत् गायत्रीमधि
कृत्य शतपथश्रुतिः तस्या उपस्थानम् गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोमा
प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धि इति वा महे वास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठते उपस्थानं चैतत् जपात् प्राक् तथा च बौ
धायनः उपतिष्ठेद्धा एतां देवीं तुरीयेण पदेन अथाप्युदाहरंति गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शता
य पदाय परोरजसे इत्यथैनां जपतीति अथापीत्यादिना तुरीयपदस्वरूपकथनं एवं श्रुतावपि परोरजस इत्यंतो मंत्रः अग्रे चार्थवादः इदं च बौधा

आ॰ यनवाक्यं राजाद्यलिखितमपि बहुजनसंमतत्वाल्लिखितं जप्यमाह योगियाज्ञवल्क्यः ओंकारः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परम् गायत्री प्रणव
द॰ श्चांते जप्ये ह्येवमुदाहृतम् एवं गायत्र्यादौ द्वितीयोंकारोच्चारणमंते मोकारत्यागश्चायुक्तः मन्वादावर्ण्यते ओंकारांतभावात् यमः सहस्रपरमां
२० देवीं शतमध्यां दशावरां गायत्रीं प्रजपेन्नित्यं सर्वकल्मषनाशिनीम् अत्र बोधायनः शतकृत्वोऽपरिमितकृत्वो वा दशावरामिति अपरिमित
कृत्वो दशोपरि शतादर्वागनियतसंख्यमित्यर्थः गोभिलः कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् गायत्र्यग्निमुखीयस्मात्तस्मादुत्थाय तां ज
पेत् वृहस्पतिः मार्जनं जलमध्ये तु प्राणायामो यतस्ततः उपस्थानं ततः पश्चात् सावित्रीजप उच्यते मार्जनं मंत्रस्नानांगभूतमपेक्षितम् यतस्ततो
जले स्थले च एवं च प्राणायामस्य संध्यांगत्वेन तस्य जले स्थले च विधानादुपस्थानपर्यंतां संध्यां जले प्यसमते गायत्रीजपस्तु स्थल सवोक्तः
कात्यायनेनोत्तीर्य प्राणायामादिकमुक्तं नरसिंहपुराणे स्नानो तरतर्पणत्वागुक्तं दर्भेषु दर्भपाणिः सन् प्राङ्मुखः सुसमाहितः प्राणायामांस्तु
कुर्वीत यथाशास्त्रमतंद्रितः जपेदहरहः स्नात्वा सावित्रीं जपवद्द्विजः अथ पुष्पांजलिं क्षिप्त्वा भानवेचोर्ध्ववाहुकः उदुत्यं च जपेन्मंत्रं चित्रं त
च्चक्षुरित्यपि प्रदक्षिणमुपावृत्य नमस्कृत्य ततः प्रभुमिति अत्र दर्भेष्विति श्रवणात् स्थल एव संध्याकरणमुक्तम् जपानंतरमुपस्थानम् प्रका
रांतरमेतत् वोधायनेपि दर्शनात् हारीतः प्रणवो व्याहृतिः सावित्रीं जपन् पापेभ्यो मुच्यते शतं जप्त्वा मानसात्पूतो भवति सहस्रं जप्त्वा वाक्काय
कृतात् पूतो भवति यमः न तथा वेदजप्येन पापं निर्दहति द्विजः यथा सावित्रीजप्येन सर्वपापैः प्रमुच्यते अथ जपविधिः तत्र शंखः कुशव्वा
मासीनः कुशोत्तरीयो वा कुशपवित्रपाणिः उदङ्मुखः सूर्याभिमुखोऽक्षमालामादाय देवतां ध्यायन् जपं कुर्यात् सुवर्णमणिमुक्ताफलस्फाटि
कपद्माक्षैंद्राक्षरुद्राक्षपुत्रजीवकानामन्यतममक्षमालां कुर्वीत कुशग्रंथिकृतां वा हस्तापर्वाभिर्वा गणयेत् देवतां ध्यायन्निति देवताध्यानस्य एम॰
२०

जपांगतयाविधानाद्यत्रनदेवताविशेषविधिस्तत्रापिमंत्रप्रकाश्यादेवताध्येया हस्तोपयामोंऽगुलीनमनम् देशमाहयाज्ञवल्क्यः गृहे
त्वेकगुणंजप्यंनद्यांतुत्रिगुणंस्मृतं गवांगोष्ठेशतगुणमग्न्यागारेशताधिकं सिद्धिक्षेत्रेषुतीर्थेषुदेवतायाश्चसन्निधौ सहस्रंशतकोटीनाम
नंतंशिवसन्निधौ तथा तिष्ठंश्चेद्वीक्षमाणोऽर्कंजपंकुर्यात्समाहितः अन्यथाप्राङ्मुखःकुर्याद्वक्ष्यमाणक्रमेणतु प्राक्कूलेषुकुशेष्वेवचा
सीनश्चासनेशुभे नात्युच्छ्रितेनातिनीचेदर्भपाणिःसुसंयतः स्फाटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः अक्षमालाहिकर्तव्याप्रशस्ताह्युत्त
रोत्तराप्राक्कूलेषुप्रागग्रेषु दीर्घकालीनफलार्थंजपेभक्ष्यमाह शाकयावकभैक्षाणिपयोमूलफलानिच दधिसर्पिस्तथाह्यापःप्रशस्तंह्युत्त
रोत्तरम् चरवोह्युपवासश्चभैक्ष्यंनक्तमयाचितं विशष्टंगाटशालूकहविष्यान्नानियानितु एतान्यनुव्रतान्याहुःशस्तानिजपकर्मणि पुनर्भैक्ष्यो।
पादानंप्रशंसार्थम् अत्रशाकादीनांविकल्पात् भक्ष्यविशेषेणजपारंभेएकादश्युपवासोपिनकर्तव्यइतिहरिहरः एतान्यनुव्रतानीत्युपसं
हारादितरव्यावृत्तौतात्पर्यम् एषांतुविकल्पःसमुच्चयोवेतिनास्याजप्यमाह मनुः वेदमेवजपेन्नित्यंयथाकालमतंद्रितः तंह्यस्याहुःपरंधर्ममुप
धर्मोन्यउच्यते वेदमेवेत्यावश्यकाभिप्रायंफलाधिक्यार्थंवा परमोधर्मइत्युपसंहारात् अतोनपौराणिकादिमंत्रजपेनिषेधः याज्ञवल्क्यः
यज्ञानांतपसांचैवशुभानांचैवकर्मणां वेदएवद्विजातीनांनिःश्रेयसकरःपरः विष्णुःस्नातश्चपवित्राणियथाशक्तिजपेत् विशेषतःसावित्रीं
पुरुषसूक्तंवानैताभ्यामधिकमस्ति शंखः नाघमर्षणात्परमंतर्जलेनत्वाहुतिभ्यःपरंहोमेनसावित्र्याःपरंजप्ये मनुयमशंखवशिष्ठहारीतयो।
गियाज्ञवल्क्याः जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते अंगिराः प्रणवाद्यास्तथावेदाःप्रणवेप्रस
वस्थिताः वाङ्मयःप्रणवःपूर्वमभ्यसेत्प्रणवंततः नरसिंहपुराणे त्रिविधोजपयज्ञःस्यात्तस्यभेदंनिबोधत वाचिकश्चउपांशुश्चमानसश्चत्रि।

धास्मृताः त्रयाणांजपयज्ञानांश्रेयान्स्यादुत्तरोत्तरः यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः मंत्रमुच्चारयेद्वाक्यंजपयज्ञःसवाचिकः शनैरु
च्चारयेन्मंत्रमीषदोष्ठौप्रचालयन् किंचिच्छ्वद्वंस्वयंविद्यादुपांशुःसजपःस्मृतः ध्येयायदक्षरश्रेण्योवर्णाद्वर्णंपदात्पदं शब्दार्थचिंतनाभ्यासः
सउक्तोमानसोजपः एवंचत्रिविधस्यापिजपस्यविधानात् नोच्चैर्जप्यंबुधः कुर्यात्सावित्र्यास्तुविशेषत् इतिशंखोक्तमल्पफलाभिप्रायम् ध्याये
तमनसामंत्राञ्जिह्वोष्ठेनविचालयेत् नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेदिति योगियाज्ञवल्क्योक्तं मानसजपविषयम् योगियाज्ञवल्क्यः
नचक्रमन्नचहसन्नपार्श्वमवलोकयन् नापाश्रितोनजल्पंश्चनप्रावृतशिरास्तथा नपदापदमाक्रम्यनचैवहितथाकरौ नचासमाहितम
नानचसंश्रावयन्जपेत् नक्लिन्नवासाःस्थलगोजपादीनाचरेद्बुधः ब्रतादृतेनार्द्रवासानैकवासाःसमाचरेत् नजीर्णेननमलिनेननपरिक्लि
ष्टेनवाजपेत् यक्षरक्षसभूतानिसिद्धविद्याधरोरगाः हरंतिप्रसभंयस्मात्तस्माद्गुप्तंसमाचरेत् जपकालेनभाषेतव्रतहोमादिकेषुच एतेष्वे
वावसक्तंतुयद्यागच्छेद्द्विजोत्तमः अभिवाद्यततोविप्रंयोगक्षेमंचकीर्तयेत् तूष्णीमासीतपाषंडचांडालपतितादिकान् दृष्ट्वातान्वार्युपस्पृश्य
भाष्यस्नात्वापुनर्जपेत् नचैवहितयाकरौपदाक्रम्येतिशेषः एतेष्वेवावसक्तंजप्यादिषुप्रवृत्तं तथा यदिवाग्यमलोपःस्याज्जपादिषुकथंचन
व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं बौधायनः कषायवासाःकुरुतेजपहोमप्रतिग्रहान् ततद्देवानगमंभवतिहव्यंकव्यंयोहविः व्यासःआ
र्द्रवासास्तुयःकुर्याज्जपंहोमंप्रतिग्रहम् सर्वंतद्राक्षसंविद्याद्बहिर्जानुचयत्कृतम् वसिष्ठः जपहोमोपवासेषुधौतवस्त्रधरोभवेत् अलं
कृतःशुचीमौनीश्राद्धादौविजितेंद्रियः लघुहारीतः जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैः
तथा चितौदर्भाः पथिदर्भायेदर्भायज्ञभूमिषु स्तरणासनपिंडेषुतान्कुशान्परिवर्जयेत् पिंडार्थंयेस्तृतादर्भायैःकृतंपितृतर्पणं मूत्रोच्छि

श्रेर्धृतायेचतेषांत्यागोविधीयते नीवीमध्येचयेदर्भाब्रह्मसूत्रेचयेधृताः पवित्रांस्तान्विजानीयाद्यथाकायस्तथाकुशाः अत्रगृह्यपरिशिष्टं
अमेध्यलिप्तायेदर्भास्तेषांत्यागोविधीयते तथा दर्भाः कृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः अयातयामान्येतानिनियोज्यानिपुनःपुनः यातया
मंचिरंतनत्वेनकार्याक्षमं मरीचिः मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः एवंचविष्णुसूत्रेकु
शानोसादनीया इतिप्रसिद्धिरसमीचीनेवछंदोगपरिशिष्टे॰ यत्रोपदिश्यतेकर्मकर्तुरंगंनचोच्यते दक्षिणस्तत्रविज्ञेयः कर्मणांपारगः करः
यत्रदिङ्नियमोनास्तिजपहोमादिकर्मसु तिस्रस्तत्रदिशःप्रोक्ताऐंद्रीसौम्यापराजिताः आसीनऊर्ध्वःप्रह्वोवानियमोयत्रनेदृशः तदासीनेन
कर्तव्यंनप्रह्वेननतिष्ठता सौम्योत्तरा अपराजिताऐशानी तथा सदोपवीतिनाभाव्यंसदाबद्धशिखेनतु विशिखोव्युपवीतिश्चयत्करोतिकृतंन
सत् सदेतिश्रवणात्कर्मकालेऽकर्मकालेचयत्रनिवीतप्राचीनावीतयोर्नविधिस्तत्रसर्वत्रोपवीतित्वं एवंचयत्रदैवकार्योद्देशेनोपवीतित्वश्रुतं
तत्रापिदैवमुपलक्षणंपितृमनुष्यकार्यातिरिक्तंसर्वंदैवमितिगोभिलः दक्षिणंबाहुमुद्धृत्यशिरोऽवधायसव्येंसे प्रतिष्ठापयति दक्षिणंकक्षम
वलंबंभवत्येवं यज्ञोपवीतीभवतिसव्यंबाहुमुद्धृत्यशिरोऽवधायदक्षिणेंसेप्रतिष्ठापयतिसव्यंकक्षमवलंबंप्राचीनावीतीभवति मनुः निवीती
नाकंठसज्जेनवायुपुराणे क्रियांयः कुरुतेमोहादनाचम्यैवनास्तिकः भवंतिहिवृथातस्यक्रियाःसर्वानसंशयः बौधायनः कर्मयुक्तोनाभे
रधःस्पर्शनंवर्जयेत् छंदोगपरिशिष्टे पितृमंत्रानुद्रवणेआत्मालंभेऽवेक्षणेअधोवायुसमुत्सर्गेप्रहासेनृतभाषणे मार्जारमूषकस्पर्शे
आक्रुष्टेक्रोधसंभवे निमित्तेष्वेवसर्वेषुकर्मकुर्वन्नुपस्पृशेत् अनुद्रवणेउच्चारणे आत्मालंभेहृदयस्पर्शे अवेक्षणेहृदयस्यैवमार्जारस्प
र्शोत्रमार्जारकृतःस्वयंकृतेस्नानस्योक्तत्वात् योगियाज्ञवल्क्यः रौद्रपैत्र्यासुराण्मंत्रांस्तथाचैवाभिचारिकान् व्याहृत्यालभ्यचात्मानमपःस्पृ

श्चान्यदाचरेत् पूर्ववाक्येपि त्वानुद्रवणे आत्मालंभे चाचमनदर्शनादयः स्पृष्ट्वाचमनपरमेव याज्ञिकसंप्रदाये जलस्पर्शमात्रं येषां पूर्वत्रा
प्यायः स्पृशेदिति पाठस्तेषां जलस्पर्श एवाविवादः परिधानाद्बहिः कक्षानिवद्धा ह्यासुरी भवेत् धर्मकर्माणि विद्वद्भिर्वर्जनीया प्रयत्नतः तथा
नाचरेत्कस्यचित्पीडां कर्मणा मनसा गिरा आचरन्नभिषेकं तु कर्माण्यन्यानि वाचरेत् विधिहीनं भावदुष्टं कृतमश्रद्धया च यत् तद्धरंत्यसुरा
स्तस्य मूढस्य ह्यकृतात्मनः तथा प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः अध्वरेष्विति वैदिककर्म
मात्रपरं अथ संध्याप्रयोगः वामेव हस्ते कुशान्दक्षिणे पाणौ पवित्रं कुशत्रयं च धृत्वा सप्रणवगायत्र्या शिखां बध्वा ऐशान्याभिमुख आचम्य कृत्तमि
त्यभिमंत्र्य पुनराचामेत् ततो वारिणात्मानं वेष्टयित्वा रक्षां कुर्यात् ततः ॐकारस्य ब्रह्मा ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारंभे वि
नियोगः सप्तव्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्जगत्यश्छंदांस्यग्निर्वाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा दे
वता अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः गायत्र्या विश्वामित्र ऋषिर्गायत्री छंदः सविता देवताऽग्निर्मुखमुपनयने प्राणायामे विनियोगः
शिरसः प्रजापतिऋषिर्ब्रह्माग्निवायुसूर्या देवताः यजुः प्राणायामे विनियोगः इति ऋष्यादिकं स्मृत्वा बद्धासनः संनिमीलितनयनो मौनी प्रा
णायामत्रयं कुर्यात् तत्र वायोरादानकाले पूरकनामा प्राणायामस्तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत् धारणकाले कुंभकस्तत्र कमला
सनं रक्तवर्णं चतुर्मुखं ब्रह्माणं हृदि ध्यायेत् त्यागकाले रेचकस्तत्र श्वेतं त्रिनेत्रं शिवं ललाटदेशे ध्यायेत् त्रिष्वप्येतेषु प्रत्येकं त्रिमंत्राभ्यासः प्रत्येक
मोंकारादि सप्तव्याहृतयः ओंकारादि सावित्री ॐकारद्वयमध्यस्थः शिरश्चेति मंत्रस्तस्य स्वरूपं ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः
ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम् ततः ॐ सूर्यश्चमेति ब्रह्मऋषिः

प्रकृतिश्छंदः सूर्य्यो देवता अपामुपस्पर्शने विनियोगः ओं सूर्य्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमका
र्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा इति म
न्त्रेणाचामेत् ओं आपः पुनंत्विति विष्णु ऋषिरनुष्टुप् छंदः आपो देवता अपामुपस्पर्शने विनियोगः ओं आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु मां पुनं
तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा इति मध्याह्ने आचा
मेत् ओं अग्निश्च मेति रुद्र ऋषिः प्रकृतिश्छंदो अग्निर्देवता अपामुपस्पर्शने विनियोगः ओं अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पा
पेभ्यो रक्षंतां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सत्ये
ज्योतिषि जुहोमि स्वाहा इत्यनेन सायमाचामेत् ततः ओं आपो हि ष्ठेत्यादि ऋचस्य सप्तभिः पदैः शिरसि अष्टमेन भूमौ नवमेन पिशिरसि कुश
त्रयेण जलं क्षिपेत् इदमेव मार्जनम् आपो हि ष्ठेत्यादि ऋचस्य सिंधुद्वीप ऋषिर्गायत्री छंदः आपो देवता मार्जने विनियोगः ओं आपो हि ष्ठा
मयोभुवस्तान ऊर्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरं गमाम वो यस्य
क्षयाय जिन्वथ आपो जनयथा च नः ततः करेण जलमादाय वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत् द्रुपदादिवेति कोकिलो राज
पुत्र ऋषिरनुष्टुप् छंदः आपो देवता सौत्रामण्यवभृथे विनियोगः ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शु
न्धंतु मैनस इति ततः करस्थं जलं नासाग्रे संयोज्य आयतासु रनायतासु वा त्रिः सकृद्वाऽघमर्षणं जपेत् अघमर्षणसूक्तस्याघमर्षण ऋषिरनु
ष्टुप् छंदो भाववृत्तो देवता अश्वमेधावभृथे विनियोगः ओं ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्राद

आ॰
द॰
२३

र्णवादधिसंवत्सरोअजायत अहोरात्राणिविदधद्विश्वस्यमिषतोवशी सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः
ततअन्तश्चरसीतितिरश्चीनऋषिरनुष्टुप्छंदआपोदेवताआचमनेविनियोगः ॐअन्तश्चरसिभूतेषुगुहायांविश्वतोमुखः त्वंयज्ञस्त्वंवषट्
कारआपोज्योतिरसोमृतमित्यनेनाचामेत् ततउत्थाय ॐभूर्भुवःस्वरितिगायत्र्याचपुष्पमिश्रंजलंसूर्याभिमुखंप्रक्षिपेत् ततोभूम्यलग्न
गुल्फतलभागोवा भूमिलग्नाङ्घ्रिचरणोवाभूमिलग्नैकचरणोवाप्रातःसायंचकृतांजलिर्मध्याह्ने ऊर्ध्वबाहुःसूर्यंध्यायन्नुपतिष्ठेत् ए
भिर्मंत्रैः उद्वयंतमित्यस्यहिरण्यस्तूपऋषिरनुष्टुप्छंदःसूर्योदेवतासूर्योपस्थानेविनियोगः ॐउद्वयंतमसस्परिस्वःपश्यंतउत्तरं देवेदेव
त्रासूर्यमगन्मज्योतिरुत्तमम् उदुत्यमित्यस्यप्रस्कण्वऋषिर्गायत्रीछंदःसूर्योदेवतासूर्योपस्थानेविनियोगः ॐउदुत्यंजातवेदसंदेवंवह
तिकेतवःदृशेविश्वायसूर्यं चित्रमित्यस्यकौत्सऋषिस्त्रिष्टुप्छंदःसूर्योदेवतासूर्योपस्थानेविनियोगः ॐचित्रंदेवानामुदगादनीकंच
क्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च तच्चक्षुरितिदध्यङ्ङाथर्वणऋषिरक्षरातीतपुरउ
ष्णिक्छन्दःसूर्योदेवतासूर्योपस्थानेविनियोगः ॐतच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येमशरदःशतंजीवेमशरदःशतꣳशृणुयामशर
दःशतंप्रब्रवामशरदःशतमदीनाःस्यामशरदःशतंभूयश्चशरदःशतात् ततःॐहृदयायनमः ॐभूःशिरसेस्वाहा ॐभुवःशिखायैवषट् ॐ
स्वःकवचायहुं ॐभूर्भुवःस्वःनेत्राभ्यांवौषट् ॐभूर्भुवःस्वःअस्त्रायफट् इत्यंगानित्रिणवत्स पूर्वोक्तमृष्यादिकंस्मृत्वापूर्वोक्तरूपांगायत्रींध्या
त्वा तेजोसीतिदेवाऋषयः शुक्रंदैवतंगायत्रीछंदोगायत्र्यावाहनेविनियोगः ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवानामना
धृष्टंदेवयजनमसीतिगायत्रीमावाह्य ॐगायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसेनमस्तेतुरीयायदर्शतायपदायपरोरजसे

एमः
२३

सावित्रीमित्युपस्थाय प्रातः प्राङ्मुखो मध्याह्ने सूर्याभिमुखस्तिष्ठन् सायं पश्चिमाभिमुख उपविष्ट उक्तविधिना गायत्रीं जपेत् जप्यस्वरूपं यथा
ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ ततः प्रणिपत्य विसर्जयेत् अथ ब्रह्मयज्ञः तत्र कात्यायनः वि
भ्राडित्यनुवाकं पुरुषसूक्तं शिवसंकल्पं मंडलब्राह्मणमित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायं च यथाश
क्त्यादावारभ्य वेदं विभ्राडित्यादिनाऽऽदित्योपस्थानं कार्यं मध्याह्ने चोदये चैव विभ्राडादीस्तया जपेदिति छंदोगपरिशिष्टदर्शनात् स्वाध्यायं
कुर्यादिति शेषः यथाशक्त्यादिना स्वाध्यायलक्षणं वेदं पठेदिति शेषः तत्रापस्तंबः यथाध्यायमुत्सृजन् वाचा मनसा च न ध्यायेयथाध्या
यमुत्सृजन् यदधीतं न तत्परित्यजन् वाचा मनसा चेत्युभयत्र अधीयीतेति शेषः एवं चानध्याये मनसाध्ययनविधानान्नैत्यिके नास्त्यनध्यायो
ब्रह्मसूत्रं हि नत्स्मृतमिति मनूक्तमानसविषयमेव छंदोगपरिशिष्टे यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते स चार्वाक् तर्पणात्कार्यः प
श्चाद्वा प्रातराहुतेः वैश्वदेवावसाने वा नान्यत्रेति निमित्तकात् ऋते निमित्तकात् जलस्थ तर्पणादि निमित्तं विना याज्ञवल्क्यः वेदाथर्वपु
राणानि सेतिहासानि शक्तितः जपयज्ञार्थसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् अत्रेयं व्यवस्था समस्तवेदाध्यायिनाऽऽदावारभ्य वेदपाठे
न स्वाध्यायः करणीयः एकदेशाध्यायिना पुरुषसूक्तादिपवित्रपाठेन सावित्रीमात्राध्यायिना प्रणवादिपाठेनेति अथ तर्पणम् तत्र शात
तपः तर्पणं तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं प्रत्यहमिति वचनान्नित्याधिकारः तदुक्तं छंदोग
परिशिष्टे तस्मात्स्वैदैवकर्तव्यमकुर्वन्महतेनसा युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्तिहि विष्णुपुराणे शुचिवस्त्रधरः स्नातो देवर्षिपितृ
तर्पणम् तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः तेषां देवर्षिपितॄणां ऋषितीर्थमंगुल्यग्रमात्रमिति बौधायनप्रोक्तम् विष्णुः स्नातश्चार्द्र

वासादेवर्षितर्पणमंभस्थएवकुर्यात् परिवर्त्तितवासाश्चेत्तीर्थमवतीर्य्य अंभस्थएवेनिच्छंदोगपक्षे कात्यायनादिभिरुत्तीर्य्येत्यनंतरंवि
धानात् स्थलाशौचपक्षेवा यदाहयोगियाज्ञवल्क्यः यत्राशुचिस्थलंवासादुदकेदेवतापितॄन् तर्प्पयेत्तुयथाकामम्प्सुसर्वंप्रतिष्ठि
तम् फलार्थमपिजलेतर्पणमाहकार्ष्णाजिनिः आपोदेवगणाःसर्वेआपःपितृगणाःस्मृताः तस्माज्जलेजलंदेयंपितॄणांदत्तमक्ष
यम् तथा देवतानांपितॄणांचजलेदद्याज्जलांजलिं असंस्कृतप्रमीतानांस्थलेदद्याज्जलांजलिम् एवंचजलतर्पणपक्षेपि असं
स्कृतप्रमीतानांस्थलएवजलदानम् अत्रचजलतर्पणपक्षेउपस्थानपर्यंतासंध्याजलेकरणीया ततस्तर्पणमात्रम् ततउत्तीर्यगा
यत्रीजपोब्रह्मयज्ञश्च तर्पणानंतरमपिब्रह्मयज्ञस्य नरसिंहपुराणादौदर्शनात् वैश्वदेवावसानेवासोस्तु हारीतः देवाश्चपितरश्चै
वकांक्षंतिसोरंतंप्रति अदत्तेतुनिराशास्तेप्रतियांतियथागतम् अदत्तेउदकंइतिशेषः पितृगाथासुयमः अपिनःसकुलेजाया
द्योनोदद्याज्जलांजलीन् नदीषुबहुतोयासुशीतलासुविशेषतः शंखलिखितौ वापीतडागोदपानेषुसप्तपंचत्रीन्वापिंडानुद्धृ
सदेवपितॄंस्तर्पयेत् अयंवाप्यादौयथासंभवसप्तपिंडाद्युद्धारः असामर्थ्यादिनास्नानाभावेपिकर्त्तव्यः तर्प्पणांगत्वात् स्नानपक्षेपि
स्नानस्यपूर्वंप्रवृत्तत्वात्स्नानांगतर्प्पणेनैवप्रसंगात् स्वतंत्रतर्प्पणाधिकारःसिद्धः अतोनपृथक्पिंडोद्धारएकप्रयोगत्वात् तदा
हयोगियाज्ञवल्क्यः उपस्थानादियत्स्नानांमंत्रवान्कीर्त्तितोविधिः निवेदनान्तंतत्स्नानमित्याहुर्ब्रह्मवादिनः उपस्थानमु
दुत्यंहीत्यादिमंत्रैः तासामपां निवेदनंदेवागातुविदइतिमंत्रेणवक्ष्यमाणम् एवंचमध्यान्हसंध्यायाः स्वतंत्राया अपिस्नानप्र
योगांतर्भावः अतएवलोकैः स्नानसंध्याकर्मणोर्नैरंतर्येणानुष्ठानं योगियाज्ञवल्क्यः आवाह्यपूर्ववन्मंत्रैरुत्तीर्य्यचकुशान्

शुचीन् प्रागग्रेषु सुरान्सम्यग्दक्षिणाग्रेषु वै पितॄन् पूर्ववत्तर्पयेदिति संबंधः तेन पितृतर्पणेपि ॐकारस्त्वपनामिति च लक्ष्यते मंत्रैरुदीर
तामवर इत्यादिभिः कल्पतरुकारस्तु पूर्ववन्मंत्रैर्याज्ञवल्क्यः पूर्वसंहितायाः श्राद्धावाहनमंत्रेणावाह्येति संबंधमाह तदयुक्तम् योगिशास्त्र
त्रयप्रोक्तमिति संहितांतराभिधानात् योगियाज्ञवल्क्यःसंहितैव पूर्वा यतः स्नानमध्ये वेतेमंत्रैर्यत्त्वयोक्ता पुनरण्योतिर्न च ग्रंथांतरमाह अ
त्रापि पूर्वोध्यायेभिधानात् किंच विश्वेदेवास इत्यृचा उशन्तस्त्वेत्यृचेति मंत्रद्वयस्यैवावाहनविनियोगान्मंत्रैरिति बहुत्वं दुर्लभम् विश्वेदे
वास इत्यादिमंत्रस्य ब्रह्मादिप्रकाशनसामर्थ्यमपि नास्तीत्युक्तैव व्याख्या तथा कार्ष्णाजिनिरावाहनमंत्रमाह नाभिमात्रे जले स्थित्वा चिंतये
दूर्ध्वमानसः आगच्छंतु मे पितर इमं गृह्णंत्वयं जलिम् एवं च देवावाहनमपि देवा आगच्छंत्विति कर्तव्यम् पित्रावाहन एवात्र मंत्रदर्श
नादावाह्यत्वपितरमेव यमः भूमौ यद्यापो दीयंते दाता चैव जलेस्थितः वृथा तद्धीयते तोयं नोपतिष्ठति कस्यचित् एतेन जलस्थो ज
ले एव तर्पणजलं प्रक्षिपेदित्युक्तम् स्थलस्थेन स्थल एव त्यक्तव्यमित्याह शंखः नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना नोपतिष्ठति तत्
सौ यद्यन्न भूमौ प्रदीयते बौधायनमते स्थलस्थेनापि तर्पणजलं जल एव प्रक्षेप्तव्यम् वासःपरिधानानंतरमप्सु तर्पणविधानात् हारीत
स्तु जलसमीपस्थेन तर्पणजलं जल एव प्रक्षेप्तव्यम् यदा चोद्धृतजलेन तर्पणं तदैव स्थले तर्पणजलप्रक्षेपः तद्विषयमेव प्रागग्रेषु
सुरानित्याह तदयुक्तम् उदकेनोदकं कुर्यात्पितृभ्यश्च कदाचन उत्तीर्य च शुचौ देशे कुर्यादुदकतर्पणमिति शंखेन जलस्थतर्पणनि
षेधार्थं शुचौ देशे तर्पणमिति विधायनोदकेष्विति पुनरुदकनिषेधस्तीरस्थस्यापि जलप्रक्षेपे कृतत्वदिति तन्मते स्थलस्थेन सर्वत्र स्थल एव तर्पण
जलं प्रक्षेप्तव्यमिति बौधायनमते स्थलस्थेन जले जलस्थेन जले प्रक्षेपः कृत इति विकल्प एव सुमंतुः आकाशे तु क्षिपेद्वारि जलस्थो दक्षिणामु

आ॰द॰
२५

खः आकाशेजलोपर्य्येव योगियाज्ञवल्क्यः यच्चुद्धृतं प्रसिञ्चेद्वैतिलान्संमिश्रयेज्जले अतोन्यथानुसंप्रेनतिलाग्राह्याविचक्षणैः
अस्यायमर्थः यच्चुद्धृतोदकमादायतर्पणं करोति तदाजलेतिलाः प्रक्षेप्तव्याः यदातुजलाशयस्थः जलमादायतदावामहस्तेनति
लग्रहणे मरीचिः तिलानामप्यभावेतुसुवर्णरजतान्वितम् तदभावेनिषिंचेत्तुदर्भैर्मंत्रेणवापुनः अत्र पूर्वपूर्वाभावेउत्तरोत्तरवि
धिरितिक्रमोवाक्यांतरविरोधात्समुच्चयः किंतुतिलादीनांसमुदितानामप्यभावेएकदेशोपादानप्रदर्शनमिदम् एवंचविनारूप्यसु
वर्णैर्नविनाताम्रतिलैः स्वर्गे विनादर्भैश्चमंत्रैश्चपितॄणांनोपतिष्ठति इतिशंखवचनं रूप्यादीनांसर्वेषामभावेनत्वेकदेशाभावेपि
सोवर्णैर्नतुपात्रेणराजतेनौदुंबरेणवा खड्गपात्रेणवाशंकुनापितृउदकंपितृतीर्थस्पृशन्दद्यादितिशंखोक्तसतिसंभवे शंकुःकीलकः
सतुसुवर्णादिनिर्मितः प्रकृतत्वात् मध्यमांगुलित्रयः करःशंकुरितिकेचित् श्रौंस्त्रौंजलांजलीन्दद्यादुच्चैस्त्वतरंततः गोशृंगमा
त्रमुद्धृत्यजलमध्येजलंक्षिपेत् अस्यार्थः पित्रादिषट्कांजलित्रयेउत्तरोत्तरवृद्धिः कर्त्तव्या गोशृंगमात्रमितितत्तीर्थाञ्जलुच्चैस्त्वनि
देशः जलमध्यइति पक्षेजलप्राप्त्यानुवादः योगियाज्ञवल्क्यः दक्षिणेपितृतीर्थेनजलंसिंचेद्यथाविधि दक्षिणेनैवगृह्णीयात्पितृ
तीर्थसमीपतः दक्षिणाकरइतिशेषः मरीचिः मुक्तहस्तेनदातव्यंमुद्रांतत्रनदर्शयेत् मुद्रातर्जन्यंगुष्ठयोगेनपितृतीर्थावरोधः शंख
लिखितौनैष्ठकाचित्तेदेवपितॄंस्तर्पयेत् उशनाः नवेष्टितशिरानक्तंकृष्णकषायवासादेवपितृकार्यंकुर्यात् योगियाज्ञवल्क्यः सवर्णे
भ्योजलंदेयंनासवर्णेकदाचन मित्रत्वादिप्रसक्तजलदाननिषेधोयंप्रकरणादिति नैतद्धलाद्धीष्मतर्पणनिषेधोयदितत्रप्रमाण
मस्ति पारस्करः ब्राह्मणेननकर्त्तव्यंशूद्रस्यैवौर्ध्वदैहिकम् शूद्रेणवाब्राह्मणस्यविनापारशवात्क्वचित् उर्ध्वदैहिकमितिसामान्यप

एमः
२५

रिग्रहात् श्राद्धादिपरिग्रहोपि पारशवो ब्राह्मणाच्छूद्रायामुत्पन्नः तेनस्वपितुः कर्त्तव्यमित्यर्थः कात्यायनः ब्रह्माणंतर्पयेत्पूर्वं वि॰
ष्णुंरुद्रंप्रजापतिं देवांश्छंदांसिवेदानृषीन्पुराणाचार्यान्गंधर्वानितराचार्यान्संवत्सरंसावयवंदेवीरप्सरसोदेवानुगान्नागान्सागरा
न्पर्वतान्सरितोमनुष्यान्यक्षान्रक्षांसिपिशाचान् सुपर्णान् भूतानिपशून्वनस्पतीन् ओषधीर्भूतग्रामंचतुर्विधम् तृप्यतामितिसों
कारपूर्वम् ततोनिवीतीमनुष्यान् सनकंचसनंदनंचतृतीयंचसनातनम् कपिलंचासुरिंचैववोढुंपंचशिखंतथा ततोपसव्यम्
निलमिश्रंकव्यवाडनलंसोमंयममर्यमणमग्निष्वात्तान् बर्हिषदोयमांश्चैके यमायधर्मराजायमृत्यवेचांतकायच वैवस्वता
यकालायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमः एकैकस्यतिलैर्मिश्रां
स्त्रींस्त्रीन्दद्याज्जलांजलीन् यावज्जीवकृतंपापंतत्क्षणादेवनश्यति जीवत्पितृकोप्येतान्यांश्चेतरः उदीरतामंगिरसआयं
तुनः ऊर्जंपितृभ्योयेचेहमधुवाताइतित्र्यृचंजपन्नसिंचेत्तृप्यध्वमितित्रिर्नमोवइत्युक्त्वामातामहाचार्यगुरुशिष्यर्त्विक्ज्ञाति
बांधवानन्यत्तर्पितादेहाद्रुधिरंपिबंति पाठक्रमादेवपूर्वत्वप्राप्तौपूर्वमितिक्रमाभिधानात्प्रत्येकंब्रह्मादीनांतर्पणत्वंएवंचतृप्यतां
मिसोंकारपूर्वमितिच प्रत्येकमभिसंबध्यते तदुक्तंयोगियाज्ञवल्क्येन अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु तृप्यतामितिम
कृत्स्नंनाम्नातुप्रणवादिनाअन्वारब्धेनपश्चाल्लग्नेनएवंचदेवतर्पणं ओंब्रह्मातृप्यतामित्यादिरूपम् बहुवचनांतंश्रुतदेवतासंबं
धेनवार्थादिहबहुवचनंपुराणानीतराणीत्साचार्यविशेषणम् सावयवइतिसंवत्सरविशेषणं साकांक्षत्वात् चतुर्विधइतिभूतग्रामविशे
षणं ततोनिवीत्यभिधानात् पूर्वमुत्सर्गसिद्धमुपवीतत्वमेवउक्तंचयोगियाज्ञवल्क्येन ब्रह्मादीनुपवीतीतुदेवतीर्थेनतर्पयेत् नि

वीतीकायतीर्थेनमनुष्यान् सनकादीकान् मनुष्यतर्पणमपि ॐसनकस्तृप्यतांमित्योंकारपूर्वमेव तृप्यतामितिसेक्तव्यमितिवा
क्यस्यतदुत्तरत्वात् ततोपसव्यमितिपितृधर्मोपलक्षणमेतत् तेनात्रऊर्ध्वंदक्षिणामुखत्वमपिकव्यवाडादौदिव्यपितृतर्पणेस्वधा
नमइत्यादियोज्यम् नमस्कारस्वधान्वितानितियाज्ञवल्क्यवचनात् पितृतर्पणेस्वधानमइतिहरिहरमतेकव्यवाडनलइसेकादेवते
तिकल्पतरुकारः तत्तुकव्यवाडादय इतिगोभिलाभिधानादयुक्तम् अतएवकामधेन्वादौकव्यवाडनलमितिपाठः यमांश्चैक इति
मंत्रांतरेणाभिधानादनावश्यकत्वं अतएववैकैकस्येत्यादिनापापक्षयरूपफलाभिधानम् नमइतिसर्वत्रचतुर्थ्यंतसंबंधः एतान्यमा
न् तेनयमतर्पणपर्यंतंजीवत्पितृकेणापिकर्तव्यम् अन्यांश्चेतरः प्रमीतपितृकः अन्यान्स्वपित्रादीनपितर्पयेदित्यर्थः जीवत्पितृ
कस्यापिपितामहादितर्पणं पितृपातित्यपक्षे येभ्योवापिपितादद्यात्तेभ्योवापिप्रदापयेदिति याज्ञवल्क्यवचनात् अत्रपित्रादितर्प
णेअंजलित्रयंयमतर्पणप्रकृतत्वात् एवंचदिव्यपितृतर्पणेप्यंजलित्रयंतद्धर्मकत्वात् एकैकस्येतितत्रापिसंबंधात् ब्रह्मादितर्पणे
मनुष्यतर्पणेचानुवृत्तौप्रमाणाभावादेकएवांजलिः केचित्तुभिक्षुः पुराणकल्पेत्रिरपः प्रीणनार्थायदेवानामपवर्जयेदितिदर्शनाद्देवतर्प
णेप्यंजलित्रयमेवेत्याहुस्तदयुक्तम् पितॄन्मातामहांनितिप्रतिपुरुषमभ्यसेदितिछंदोगपरिशिष्टेषट्पुरुषमात्रेआवृत्तिदर्शनात् ए
वंचस्त्रीतर्पणपक्षेप्येकएवांजलिः त्रींस्त्रीन्जलांजलीनितियमोक्तं षट्पुरुषमात्रगोचरमितिबोद्धव्यं तथाच एकैकमंजलिंदेवाद्वौ
द्वौनुसनकादयः अर्हंतिपितरस्त्रीस्त्रीनुस्त्रियोप्येकैकमंजलिं एवंचउदीरतामवरइत्यादिमंत्रनवकस्यपित्रादित्रिकांजलिनवके
संबंधः जपन्मंत्रान्यथाक्रममिति योगियाज्ञवल्क्यवचनात् प्रत्येकमंजलीनांदेयत्वान्मंत्राणामपिप्रत्येकंप्रकाशनसामर्थ्यात् सर्वत्र

चसर्वान्वये आवृत्तिर्विकल्पो वा स्यात् एवं चैकैकमंत्रपाठानंतरमेकैकांजलिदानं मंत्रानेकर्मादिसन्निपातनियमात् अत एव ज
पन्निनिवर्तमानसामीप्यान्नतु मंत्रपाठकाल एव जलसेकः गोत्राद्युच्चारणाभावप्रसंगात् न च मंत्रात्माकृवाक्यमित्यपि युक्तम् त्वा
गार्थकत्वात् यदाहुर्वाक्यमात्रेण तर्पणमादौ उदीरतामित्यादिमंत्रैस्तु सेकमात्रं पाठकाल एव तत्रामंत्र वहृत्स्वार्थमिति तन्न कर्मान्तर
कल्पनापत्तेः मंत्रैश्च देयमुदकमिति विरोधाच्च तृप्यध्वमिति त्रिरिति पित्रादित्रयं मिलितमुद्दिश्य तृप्यध्वमित्यनेन वारत्रयमुदकं देयमि
त्यर्थः न तु पाठमात्रमेतत् अदृष्टार्थतापत्तेः प्रसिंचेदित्यन्वयाच्च मातामहादित्रिके तु नमो वइत्युक्ते स्वभिधानादेकवारमेव मंत्रमुच्चार्य
तर्पणम् प्रसिंचेदिति श्रवणाज्जलसेकमात्रं तर्पणमपि कुर्वंति न पितृनुद्दिश्य त्याग इति भ्रमो हेयः नामगोत्रस्वधाकारैस्तर्पयेः सुरनु
पूर्वश इति योगियाज्ञवल्क्येन त्यागस्यैवावगमात् एवं च देवतर्पणेपि त्याग एव तुल्यतया निर्देशात् कात्यायनानुक्तमपि देवतर्पणमनु
ष्यतर्पणयोर्मध्ये कृष्णंतरोक्तमरीच्यादितर्पणमपि कुर्वन्ति युक्तं चैतत् देवर्षिपितृतर्पणमिति प्रागुक्तत्वात् अत एव योगियाज्ञव
ल्क्यवाक्यात्स्मृतिमहार्णवलिखितं मरीच्यादितर्पणं पद्मपुराणादृषिदेहेणोक्तमङ्कामधेनौ योगियाज्ञवल्क्यवचनमेव लिखितं तथा
षट्पुरुषतर्पणानंतरं तेषां स्त्रियस्तर्पयीस्त्रीन् पितृतत्स्त्रीन्मातृतः पत्नीश्च पितृतर्पणमिति गोभिलवचनात् वौधायनेनापि पितृतर्पणा
नंतरं मातृतर्पणं ततो मातामहतर्पणं ततो मातामहादितर्पणमुक्तं शंखः स्नानः कृतजपो नजानुरुदङ्मुखश्चादिमेन तीर्थेन देवानुदके
न तर्पयेत् अथ कृतापसव्यो दक्षिणामुखो नजानुः पित्र्येन तीर्थेन पितृभ्यो यथाश्राद्धं यथाप्रकाशमुदकं दद्यात् पित्रे पितामहाय प्रपिता
महाय मात्रे पितामह्यै प्रपितामह्यै आसप्तमात्पुरुषात्पितृपक्षे यावतां नाम जानीयात् पितृपक्षाणामुदकतर्पणं कृत्वा गुरूणां कुर्यात्॥

आ॰द॰
२७

मातृपक्षाणां कृत्वा संबंधिबांधवानां कुर्यात् तेषां कृत्वा सुहृदां कुर्यात् अंतर्जानुर्मध्यकृतनकरः उदङ्मुखश्चेति चकारात्प्राङ्मुख
तापि मनुश्शातातपयोगियाज्ञवल्क्याः यदेष तर्पणेयत्नैर्द्भिः पितॄंस्नात्वाद्विजोत्तमाः तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलं पद्मपुरा
णे ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं देवायक्षास्तथा नागा गंधर्वाप्सरसोऽसुराः क्रूराः सर्पाः सुपर्णाश्च तरवो जंभकाः खगाः
विद्याधरा जलाधारास्तथैवाकाशगामिनः निराधाराश्च ये जीवाः पापे धर्मे रताश्च ये तेषामाप्यायनायैतद्दीयते सलिलं मया कृतो
पवीतो देवेभ्यो निवीती तु भवेत्ततः मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्ततः सनकश्च सनंदनश्च तृतीयश्च सनातनः कपिलश्चा
सुरिश्चैव वोढुः पंचशिखस्तथा सर्वे ते तृप्तिमायांतु मद्दत्तेनांबुना सदा मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं प्रचेतसं वसिष्ठं च भृ
गुं नारदमेव च देवान्ब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैः अपसव्यं ततः कृत्वा सव्यं जानु च भूतले अग्निष्वात्तांस्तथा सोम्यान्हविष्मं
तस्तथोष्मपान् सुकालिनो बर्हिषदस्तथा चैवाज्यपान्पुनः तर्पयेच्च पितॄन्भक्त्या सतिलोदकचंदनैः दर्भपाणिस्तु विधिना प्रेतान्सं
स्तर्पयेत्ततः पित्रादीन्नाम गोत्रेण तथा मातामहानपि संतर्प्य भक्त्या विधिवदिमं श्लोकमुदीरयन् ये बांधवाऽबांधवा ये अन्यजन्म
नि बांधवाः ते तृप्तिमखिलां यांतु यश्चास्मत्तोभिवांछति अत्र हरिहरः देवादीनां ओं देवास्तृप्यंतामित्यादिवाक्येन तर्पणम् तेषामा
प्यायनायैतदिति तद्ध्यानमात्रं तदयुक्तम् श्रुतवाक्यं विहाय वाक्यांतरकल्पनायाश्चायुक्तत्वात् तस्माद्यत्र ब्रह्माणमित्यादौ वाक्यं न
श्रुतं तत्रैव योगियाज्ञवल्क्यवाक्याद्युक्तवाक्यपरिग्रहः निवीती च भवेत्तत्र इति श्रवणादृषितर्पणे निवीतित्वभ्रमो हेयः निवीतस्य मनु
ष्यधर्मतया तत्र तत्राभिधानात् केचित्तु अथ निवीती ऋषींस्तर्पयामीति बोधायनदर्शनान्मरीच्यादितर्पणे निवीतित्वमेवाहुः अस्य

राम:
२७

तोदकैरित्यत्राक्षतपदं यवपरं यवाद्भिस्तर्पयेद्देवानिति परिशिष्टदर्शनात् अत्र ब्रह्मादिचतुष्टयं ओंकारादिना तृप्यतामित्यंतेन नाम्नादे
वादीन् देवा यक्षा इत्यादिना दीयते सलिलं मयेत्यंतेन उपवीती ततो निवीती सनकादीन्सनकश्चेत्यादिना सदेत्यंतेन तत उपवीती म
रीच्यादीन् दशऋषीन् ओं मरीचिस्तृप्यतामित्यादिनामंतेन एतान्सर्वान्यवमिश्रितजलैः ततः प्राचीनावीती अग्निष्वात्तादीन् सप्त
दिव्यपितृगणान् ओं अग्निष्वात्तास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नम इतिरूपेण ओं अद्यामुकगोत्रः पिता अमुकशर्मा तृप्यता
मिदं जलं तस्मै स्वधा इत्यादिवाक्यैः षट्पुरुषान् ओं अद्यामुकगोत्रा माता अमुकदेवी तृप्यतामिदं जलं तस्मै स्वधा इत्यादिवाक्यै
स्तेषां स्त्रियस्तर्पयित्वा येबांधवा इत्यादिश्लोकेनावसानांजलिं दद्यादिति प्रयोगः अथ कातीयतर्पणप्रयोगः ओं ब्रह्मास्तृप्यंतां ओं
विष्णुस्तृप्यंतां ओं रुद्रस्तृप्यंतां ओं प्रजापतिस्तृप्यंतां ओं देवास्तृ० ओं छंदांसितृ० ओं वेदास्तृ० ओं ऋषयस्तृ० ओं पुराणाचार्यास्तृ० ओं गंध
र्वास्तृ० ओं इतराचार्यास्तृ० ओं संवत्सरः सावयवस्तृ० ओं देव्यस्तृ० ओं अप्सरसस्तृ० ओं देवानुगास्तृ० ओं नागास्तृ० ओं सागरास्तृ० ओं पर्वता०
ओं सरितस्तृप्यंतां ओं अप्सरसस्तृप्यंतां ओं यक्षास्तृ० ओं रक्षांसिस्तृ० ओं पिशाचास्तृ० ओं सुपर्णास्तृ० ओं भूतानितृप्यंतां ओं पशवस्तृ० ओं वनस्पतय०
ओं ओषधयस्तृ० ओं भूतग्रामश्चतुर्विधस्तृ० इत्युपवीती प्राङ्मुख उदङ्मुखो वा देवतीर्थवर्त्तिना यवोदकेनोदकेनैव वा तर्पयेत् ततः ओं
मरीचिस्तृप्यताम् ओं अत्रिस्तृ० ओं अंगिरास्तृ० ओं पुलस्त्यस्तृ० ओं पुलहस्तृ० ओं क्रतुस्तृ० ओं प्रचेतास्तृ० ओं वसिष्ठस्तृ० ओं भृगुस्तृ० ओं नारदस्तृ०
इति ऋषीन्देववत् ततः ओं सनकस्तृप्यताम् ओं सनंदनस्तृ० ओं सनातनस्तृ० ओं कपिलस्तृ० ओं आसुरिस्तृ० ओं वोढुस्तृ० ओं पंचशिखस्तृ०
मिति मनुष्यान् निवीती कायतीर्थेनेति विशेषः ततोपसव्यम् ओं कव्यवाडस्तृप्यंतामिदं तिलोदकं तस्मै स्वधा नमः ओं नलस्तृप्यंतामिदं

आ॰द॰ २८

तिलोदकं तस्मै स्वधा नमः ॐ सोमस्त॰ मिदं॰ ॐ यमस्त॰ मिदं तिं॰ ॐ अर्य्यमास्त॰ मिदं तिं॰ ॐ अग्निष्वात्तास्त॰ मिदं तिं॰ ॐ सोमपास्त॰
मिदं तिं॰ तेभ्यः स्वधा नमः ॐ बर्हिषदस्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः इति दिव्यपितॄन् प्राचीनावीती दक्षिणाभिमुखः पातितवा
मजानुः सतिलजलांजलित्रयेण पितृतीर्थेन तर्पयेत् ततः ॐ यमाय नमः ॐ धर्मराजाय नमः ॐ मृत्यवे॰ ॐ अंतकाय॰ ॐ वैवस्वता॰
ॐ कालाय॰ ॐ सर्वभूतक्षयाय॰ ॐ उदुंबराय॰ ॐ दध्नाय॰ ॐ नीलाय॰ ॐ परमेष्ठिने नमः ॐ वृकोदराय॰ ॐ चित्राय॰ ॐ चित्रगुप्ताय नमः इति
चतुर्दश यमान्प्रत्येकं सतिलांजलित्रयेण तर्पयेत् ॐ आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिमिति पितॄनावाह्य ॐ उदीरतामवर उत्परा
स उन्मध्यमाः पितरः सोम्यासः असुं य ईयुरवृका ऋतज्ञास्ते नोवंतु पितरो हवेषु ॐ अद्यामुकगोत्रः पितामुकशर्मा तृप्यंतामिदं जलं स
तिलं तस्मै स्वधेति मंत्रेण वाक्येन च प्रथममंजलिं पित्रे दद्यात् ॐ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं सु
मतौ यज्ञियानामपि भद्रे सौमनसे स्याम इति मंत्रेण वाक्येन च द्वितीयांजलिं दद्यात् ॐ आयंतु नः पितरः सोम्यासोऽग्निष्वात्ताः पथि
भिर्देवयानैः अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु तेवंत्वस्मानिति मंत्रेण वाक्येन च तृतीयांजलिं पित्रे दद्यात् ॐ ऊर्जं वहंतीरमृतं घृ
तं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् ॐ अद्यामुकगोत्रः पितामहोऽमुकशर्मा तृप्यतामिदं जलं सतिलं तस्मै स्वधा इति
पितामहाय प्रथमांजलिं दद्यात् ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायि
भ्यः स्वधा नमः अक्षन्पितरोमीमदंत पितरोतीतृपंत पितरः पितरः शुंधध्वमिति मंत्रेण वाक्येन च द्वितीयांजलिम् ॐ ये चेह पितरो
ये च नेह यांश्च विद्म यां उ च न प्रविद्म त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व इति मंत्रेण वाक्येन च तृतीयांजलिम्॥

एमः २८

R·h:२।६।:२५४।:२।५९९

ॐमधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नः संत्वोषधीः ॐअद्यामुकगोत्रः प्रपितामहोऽमुकशर्मातृप्यतामिदंजलंसतिलंतस्मै
स्वधाइतिमंत्रेणवाक्येनचप्रपितामहायप्रथमांजलिंदद्यात् ॐमधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनःपिताइति
मंत्रेणवाक्येनचद्वितीयांजलिम् ॐमधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः माध्वीर्गावोभवंतुइतिमंत्रेणवाक्येनचतृतीयांजलिंप्रपितामहा
यदद्यात् ततः ॐतृप्यध्वंतृप्यध्वंतृप्यध्वमितिपित्रादिभ्योंऽजलित्रयंदद्यात् ॐनमोवःपितरोरसायनमोवःपितरोनमोवोगृहान्नःपितरोदत्तसतोवः
पितरोदेष्मेतद्वःपितरोवासइतिमंत्रंपठित्वाॐअद्यामुकगोत्रामातामहोऽमुकशर्मातृप्यतामिदंजलंसतिलंतस्मैस्वधाइतिमातामा
हायांजलित्रयंदद्यात् एवंप्रमातामहायवृद्धप्रमातामहायच ततः ॐअद्याऽमुकगोत्रामाताअमुकीदेवीतृप्यतामिदंजलंसतिलं
तस्मैस्वधेतिमातरम् एवंमेवपितामहीप्रपितामहीमातामहीप्रमातामहीवृद्धप्रमातामहीस्तर्पयेत् ततः आचार्यादीन्नामगोत्रस्व
धाकारैस्तर्पयेत् विष्णुपुराणे इदंचापिजपेदंबुददेवात्मेछयानृप उपकारायभूतानांकृतेदेवादितर्पणः देवासुरास्तथायक्षाना
गागंधर्वराक्षसाः पिशाचागुह्यकाःसिद्धाःकूष्मांडास्तरवःखगाः जलेचराभूमिलयावाय्वाधाराश्चजंतवः प्रीतिमेतेप्रयांत्वाशुम
द्दत्तेनांबुनाखिलाः ॐनरकेषुसमस्तेषुयातनासुचयेस्थिताः तेषामाप्यायनायैतद्दीयतेसलिलंमया ॐयेबांधवाबांधवावायेन्य
जन्मनिबांधवाः तेतृप्तिमखिलांयांतुयश्चास्मत्तोभिवांछतिः इदंचकाम्यतर्पणंमेभिरेवश्लोकैर्देवविधिनाकर्त्तव्यम् अथवसिष्ठः
स्नानस्याद्यांतुदातव्यामृदस्तिस्रोविशुद्धये इतिपराशरः जलमध्येतुयःकश्चिद्द्विजातिर्ज्ञानदुर्बलः निःपीडयतितद्वस्त्रंस्नानंत
स्यवृथाभवेत् योगियाज्ञवल्क्यः अन्नप्रकरवत्तस्याअपसव्येनपीडनम् पीडयित्वाततःपश्चाज्जपंकुर्यात्सुविस्तरम् अन्नप्रक

खनत्श्राद्धोच्छिष्टसमीपान्नविकिरवत् तेनदक्षिणामुखत्वादि असंस्कृतप्रमीततनोद्दृश्यत्वंच तथाचगोभिलीयोमंत्रः येकेचास्म
त्कुलेजाताअपुत्रागोत्रिणोमृताः तेतृप्यंतुमयादत्तंवस्त्रनिष्पीडनोदकमित्तियोड्यित्वेत्यादिनादर्शितोजपश्चच्छंदोगविषयः कात्या
यनादिभिरनभिधानात् गोभिलसंवादाच्चहरिहरस्तुवाजसनेयिनांजपानंतरमेवैतदनुष्ठानेनैवाजपीयूयशोणानमित्यस्यापिसिद्धि
माह अथतर्पणोत्तरंकर्म तत्रविष्णुपुराणे आचम्यचततोदद्यात्सूर्यायसलिलांजलिम् नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे।
जगत्सवित्रेशुचयेनमस्तेकर्मदायिने कात्यायनः निष्पीड्यवस्त्रमाचम्यब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिंगैरर्चयेत् ॐ
अहंश्रमस्पहछं सइत्युपस्थायप्रदक्षिणीकृत्यनमस्कृत्यदिशश्चदेवताश्चब्रह्माग्निपृथिव्योषधिवान्वाचस्पतिविष्णुमहद्भ्योऽपा
पतयेनवरुणायनमः इतिसर्वत्रसंवर्चसेतिमुखंविमृश्येद्वागानुविदइतिविसर्जयेदेषः स्नानविधिः तल्लिंगैर्ब्रह्मादिप्रकाशकैरर्चे
येदितिब्रह्मादीन्निर्दिशेयः एषाचपूजापुष्पैरेवतथाच योगियाज्ञवल्क्यः ध्यात्वाप्रणवपूर्वंतुदेवतंसुसमाहितः नमस्कारेणपुष्पा
णिविन्यसेत्तुपृथक्पृथक् कात्यायनेनाप्यादौसुमनसआहृत्येतिसूर्यांजलिदानार्थमेतत्पूजार्थंचपुष्पोपादानमुक्तम् आवा
हनमित्यादिविष्णुपूजाप्रकारांतरंयोगियाज्ञवल्क्यमते॰ एवंसावित्रमैत्रैर्वारुणेरितिसावित्र्यादिमंत्रबहुत्वंतन्मतएवकात्यायने
नब्रह्मादीनांसमासेनोक्तत्वात् एकैकपरत्वेपिबहुत्वोपपत्तेः दिशश्चेतिचकारान्नमस्कृत्येति पूर्वत्रापिसंबध्यते देवतादिशमे
वाऽत्रकेचित् श्रुतदिगादिशब्दमनादृत्यप्राच्यादिपदेनदिङ्नमस्कारंइन्द्रादिपदेनदिग्देवतानमस्कारंकुर्वंति ब्रह्माग्नीत्यादौस
मासनिर्दिष्टेपिपृथक्नमस्कार्यत्वंनमइतिसर्वत्राप्युपसंहारात् विष्णुःमहद्भ्यइतितुमिलितस्यैवनमस्कार्यत्वम् अद्भ्यइतिपृथ्य

गुपादानात् एषस्नानविधिरित्युपसंहारः एतत्सर्वं स्नानप्रयोगानुवृत्तेर्ज्ञापनार्थमेनस्य प्रागेव प्रपंचितम् अत्र पूजादिप्रकारः
ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॐ ब्रह्मणे नमः
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे ॐ विष्णवे नमः ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः बाहुभ्यामुत ते न
मः ॐ रुद्राय नमः ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ सवि
त्रे नमः ॐ मित्रस्य चर्षणीधृतो वो देवस्य सानसि द्युम्नं चित्रश्रवस्तमम् ॐ मित्राय नमः ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय त्वा
मवस्युराचके ॐ वरुणाय नमः इति ब्रह्मादीन्संपूज्योत्थाय ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ अनु भ्राजन्तो अग्नयो यथा
ॐ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् इति द्वा
भ्यां सूर्यमुपस्थाय प्रदक्षिणीकृत्य ॐ आदित्याय नमः इत्यादित्यं नमस्कृत्य ॐ दिग्भ्यो नमः ॐ दिग्देवताभ्यो नमः ॐ ब्रह्मणे नमः
ॐ अग्नये नमः ॐ पृथिव्यै नमः ॐ ओषधिभ्यो नमः ॐ वाचे नमः ॐ वाचस्पतये नमः विष्णवे नमः महद्भ्यो नमः अद्भ्यो नमः अपां
पतये नमः वरुणाय नमः इति नमस्कृत्य ॐ संवर्चसा पयसा संतनूभिरगन्महि मनसा सं शिवेन त्वष्टा सुदत्रो विदधातु रायोनुमा
र्ष्टु तन्वो यद्विलिष्टं इति जपं सजलकरद्वयेन मुखं संस्पृश्य ॐ देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञं स्वाहा
वाते धा इति विसर्जयेत् अथ योगियाज्ञवल्क्यः प्रक्षाल्य तीरदेशं तु गत्वा स्वं धर्ममाचरेत् गत्वा गृहमिति शेषः तथा संस्त्रवादिषु यथा च
म्य सोपानस्को ह्यसंस्पृशन् आगतः सोदपात्रस्तु यत्नेन शुचिरेव सः तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य तथा गृहे ततः कर्माणि कुर्वीत

आ॰द॰
३०

नित्यंवैयासिकानिचपात्रादिरहितंतोयमुद्धृतंसमपाणिनानीतेनप्रोक्षणंकुर्यात्हस्त्रनिष्पीडनेनचसौवर्णराजतंताम्रमुख्यपात्रंप्रकीर्तितं
तदभावेस्मृतंपात्रंस्रवतेयत्रधारितम् शातातपः वहिर्नद्यादिष्वाचांतःसोदकःकिंचिदस्पृशन् रथ्यागतोपियत्नेनशुचिरेवहिमानवःत
थानाधोवस्त्रैकदेशेनशुध्यर्थमपआहरेत् यद्यानीतंतुसमेनप्रोक्षयेद्दक्षिणेनतु पद्मपु॰ आचम्यविधिवत्सम्यगालिख्यपद्ममग्रतःअक्ष
ताद्भिःसपुष्पाभिःसतिलारुणचंदनैः अर्घ्यपाद्यंप्रयत्नेनसूर्यनामानुकीर्तनैः नमोस्तुविष्णुरूपायनमस्तेब्रह्मचारिणे सहस्ररश्मयेनि
त्यंनमस्तेसर्वतेजसे नमस्तेरुद्रवपुषेनमस्तेभक्तवत्सल पद्मनाभनमस्तेस्तुकुंडलांगदभूषण नमस्तेसर्वलोकेशसुप्तानामपिबुध्यसेसु
कृतंदुःकृतंचैवसर्वंपश्यसिसर्वदा सर्वदेवनमस्तेस्तुप्रसीदममभास्कर दिवाकरनमस्तेस्तुप्रभाकरनमोस्तुते एवंरविंनमस्कृत्यत्रिःकृ
त्वाचप्रदक्षिणाम् द्विजंगांकांचनंस्पृष्ट्वाततोविष्णुगृहंव्रजेत् आश्रयस्थंततःपूज्यप्रतिमांचापिपूजयेत् अक्षतमत्रतंडुलाःसूर्यार्चा
तेरेतथादर्शनात् अर्घ्यपाद्यंदातव्यंइतिशेषः आश्रयस्थंजलस्थम् अथदेवपूजातत्रविष्णुपुराणेसूर्याञ्जलिमुक्त्वा ततोगृहार्चनंकु
र्यादभीष्टसुरपूजनम् जलाभिषेकंपुष्पाणांधूपादेश्चनिवेदनम् आदिपदेनगंधदीपनैवेद्यग्रहणम् यमःदेवमाल्यापनयनंदेवा
गारसमूहनम् स्नपनंसर्वदेवानांगोप्रदानसमंस्मृतम् ब्रह्मपु॰ देवानांप्रतिमायत्रघृताभ्यंगस्समाभवेत् पलानितस्यैदेयानिश्रद्धयापं
चविंशतिः अष्टोत्तरपलशतंस्नानंदेयंचसर्वदा द्वेसहस्रेपलानांतुमहास्नानेचसंख्यया दातव्यंयेनसर्वासुदिक्षुनिर्यातितत् घृतमः
ब्रह्मांगलग्नंविप्रेभ्योवैष्णवंचप्रदीयते रुद्रांगलग्नमग्नौचदहेत्सर्वंचनतत्क्षणात् शिष्टेभ्योप्यथदेवेभ्योयत्तदीनेषुनिक्षिपेत् विप्रेभ्य
स्तच्चतद्देयंब्रह्मणेयन्निवेदितम् वैष्णवंसात्वतेभ्यश्चभस्मांगेभ्यश्चशांभवम् सौरंगमेभ्यःशाकेभ्यस्तापिनेयन्निवेदितम् स्त्रीभ्यश्चदेयं

रामः
३०

मातृभ्योपत्तुकिंचिन्निवेदितम् भूतप्रेतपिशाचेभ्यो यत्तुदीनेषुनिक्षिपेत् प्रतिमेत्युपलक्षणम् तेनलिंगेपिद्रुपमेवाभ्यंगादिद्रव्यसंख्या
यद्यपिदृष्टंतंप्रक्षकंतंतथापिदुग्धादिस्नानेपीयमेवव्यवस्थाएतच्चभविष्यपुराणे० ब्रह्मांडलग्नमित्यादिनास्नानघृतादिप्रतिपत्तिःविप्रेभ्य
स्त्वथेत्यादिनादत्तनैवेद्यादिप्रतिपत्तिः सात्वतोव्रात्याद्वेष्यादीत्यधिकृत्यपंचमः सात्वतोनामविष्णोरायतनानिच पूजयत्यात्तयाराज्ञो
वदिस्यात्संयतेंद्रियः इतिब्रह्मपुराणेवदर्शितः तापिनेवुद्धाय एनतुतिथिकृत्यादौयत्रवुद्धपूजाविहितानात्परमिदम् मातृभ्यइतिदेवीम
त्रोपलक्षणः पूजाधारमाह शातातपः भूमावप्सुतथाग्नौचदिविसूर्येचदेवता तथाअप्सुदेवामनुष्याणांदिविदेवामनीषिणाम् काष्ठलो
ष्ठेषुमूर्खाणांमुक्तस्यात्मनिदेवताः सोमसूर्यपूजायाम् लिंगंशिवपूजायांयः प्रतिमासर्वदेवानामितिस्थानांनरेक्तम् देवीपुराणे शुचिर्वस्त्र:
धरःप्राज्ञोमौनीध्यानपरायणः गतकामभयद्वेषोरोगमात्सर्यवर्जितः आत्मानंपूजयित्वातुस्रग्गंधसितवाससा सुमुहूर्तेयजेद्देवान्स्वकी
यासनसंस्थितान् आहूयचार्घपाद्यादिहेमपात्रेणदापयेत् रक्तविल्वाक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः सामान्यःसर्वदेवानामर्घोयंपरिकी
र्तितः अभावाद्दधिदूर्वादेर्मानसंवाप्रकल्पयेत् सुमुहूर्तइतिविहितपूर्वाण्हादिकालपरम् रक्तंकुंकुममितिकल्पतरुकारः अक्षतानामक्त
डुलाः सूर्यविष्णुशिवदुर्गाणांसामान्यतःपंचोपचाराः चंदनागुरुकर्पूरकुंकुमान्यनुलेपने पुष्पाणिगिरिवनस्ववाटिकासंभवानिसुगंधी
निस्वयंविकसितानिकेशकीटरहितानि अपर्युषितानिस्वयमपि पतितानि अखंडानिआर्द्राणिचप्रोक्षितानिपत्राण्यपीदृशानिनिर्गंधी
न्यपीतिविशेषः धूपेगुग्गुलुःसघृतः केवलोवाकृष्णागुरुर्वादीपे घृतंतैलंवानैवेद्येभक्ष्यभोज्यकंदमूलफलान्नपानकादीनि फलंपक्वं
मक्वथितंकृम्यविद्धंपक्वान्नंवैश्वदेवार्थमग्रमुद्धृत्यदातव्यं प्रतिदेवंस्नानंविशेषाःपंचोपचारविशेषाश्चजपस्तुतिप्रदक्षिणप्रणामविसर्जनविशेषाः

आ०
द०
३१

श्चविस्तरतयानलिखिताः इदानीं निषेधास्तत्र नरसिंहपुराणे शतनुं प्रति नारद वाक्यं अतः प्रभृति निर्माल्यं मा लंघय महीपते नरसिंहस्य देव
स्य अन्येषां च दिवौकसाम् भविष्यपुराणे यथा न लंघयेत्कश्चित्स्नपनं भास्करस्य च तथा कार्यं प्रयत्नेन लंघितं ह्यशुभावहं तामिस्रं नरकं क्र
तीलंघयेद्यः स रौरवम् देवीपुराणे वस्त्रं गुलिविहीनं तु न पात्रं कारयेत्क्वचित् न क्वचिदिति स्नानादौ निषेधः बौधायनः परिहितमधिरूढम
प्रक्षालितं प्रावरणं मललुलितं मनुष्यसंगतं न द्देवत्तायेन संपुज्यात् लघुहारीतः स्नानं कृत्वा तु ये केचित्पुष्पं गृण्हंति वै द्विजाः देवतास्तन्न गृण्हंती
भस्मीभवंति दारुवत् देवीपुराणे शिवे विवर्जयेत्कुंदमुन्मत्तं च हरे न तथा देवीनामर्कमंदारौ सूर्यस्य तगरं तथा दुर्गायामर्कमंदारयोर्विहितत्वाद्दे
वीपदं तदितरपरं सूर्यस्यात्र तगरस्य निषेधात् कृज्जकस्तगरश्चेति भविष्यत्पुराणो विधिः केवलविहिताभावे एवमन्यत्रापि केवलविहिताभावे
विहितनिषेधोपादानम् भविष्यपुराणे कृष्णलोन्मत्तकं कांचीं तथा च गिरिकर्णिकां न कंटकारिकापुष्पं तथान्यद्गंधवर्जितम् न चाम्रातकजैः पु
ष्पैरर्चनीयो दिवाकरः कृष्णलाकरंजनीति प्रसिद्धा कांची वराही गिरिकर्णिका अपराजिता कंटकारिका विहितापि विष्णुपूजायाम् वामन
पुराणे सुरभीणि तथान्यानि वर्जयित्वा तु केतकीम् केतकाशोकचंपकेरिति नरसिंहपुराणीये विधिः काम्यपूजायां नरसिंहमूर्तौ वा शिवपू
जायां भविष्यपुराणे केतकीचातिमुक्तश्च कुंदो यूथी मदंतिका शिरीषसर्जबंधूककुसुमानि विवर्जयेत् अंकोलपत्रकुसमं करंजेंद्र त्तरु
द्भवं बिभीतकानि धन्वानि कुसुमानि विवर्ज्जयेत् निर्गंधीत्युग्रगंधीनि कुसुमानि विवर्ज्जयेत् गंधहीनमपि ग्राह्यं पवित्रं यत्कुशादिकं अ
तिमुक्तो माधवीलता मदंतिका यूथ्यनुकारी पुष्पं इन्द्रतरुः सिंदुवारः तथा न सल्लकीजं नाक्षोटं न शुल्कागुरुसंभवम् दद्याद्दर्कीयधर्मात्मा
धूपमाराधनोद्यतः अक्षोटं गिरिजं पीलुप्रभवम् तथा सूर्यदीपाधिकारे तांश्च दत्वा न हिंसेत न तैलपरिवर्ज्जेतान् कुर्वीत दीपहर्वीचमूष

राम
३१

कोंधश्च जायते विष्णुः न नक्तं गृहीतेनोदकेन देवकार्यं कुर्यात् चंदनं कुंकुमागुरुकर्पूरमृगमदजातीफलवर्ज्जमनुलेपनं न दद्यात् न
वासो नीलं रक्तं न मणिसुवर्णयोः प्रतिरूपमलंकरणं नोग्रगंधपुष्पं नागंधि न कंटकिजं कंटकिजमपि शुक्लं सुगंधि यत्तद्दद्यात् न रक्तं द
द्यात् रक्तमपि कुंकुमं जलजं दद्यात् न धूपार्थं जीवजातं न घृतं तैलं विना किंचन दीपार्थं नाभक्ष्यं नैवेद्यार्थं भक्ष्येष्वपि अजामहिषीक्षीरं
पंचनखमत्स्यवराहमांसानि च प्रयतः सन् शुचिर्भूत्वा सर्वमेव निवेदयेत् तन्मनाः सुमना भूत्वा रागक्रोधविवर्ज्जितः कुंकुमं जलजं चेति
विहितरक्तपुष्पोपलक्षणं तेन रक्तान्यन्तरोक्तान्यपि शमीकुशपलाशाशोककरवीरपाटलपारिभद्रपुष्पाणि देयानि एते च निषेधा विष्णुपू
जामुपक्रम्य विष्णूक्ता इति तत्रैव निबंधकर्त्तृभिर्लिखिताः अत्राहुर्देवकार्यमिति सामान्यवचनात्सर्वविषयत्वं न च देवपदं विष्णुपरं संको
चापत्तेः प्रकरणाद्देव विष्णुप्राप्तौ वैयर्थ्यापत्तेश्च तस्मात्पूर्वाध्याये नैव विष्णुपूजाकथनं न रक्तमित्यध्यायांतरं सामान्यविषयमिति काल
कापुराणे शिवं भास्करमग्निं च केशवं कौशकीमपि चेतसा नर्च्चयन्याति देवलोकादधोगतिं कौशिकी दुर्गा भविष्यपुराणे सदा यजंति ये त्ते
न सदा दानंददंति च सदा च वायुभक्षास्ते नित्यं येर्च्चंति भास्करम् नरसिंहपुराणे यस्तु पूजयते नित्यं नरसिंहं सुरेश्वरं स स्वर्गमोक्षभागी स्या
न्नात्र कार्या विचारणा भविष्यपुराणे० न हि लिंगात्परं किंचित्पुण्यमभ्यधिकं क्वचित् इति विज्ञाय यत्नेन पूजनीयः सदाशिवः तथा दुर्गार्च्च
नरतो नित्यं महापातकसंभवैः दोषैर्न लिप्यते वीर पद्मपत्रमिवांभसा अन्नचक्रमानभिधानेपि सूर्यपूजाप्राथम्यमाचारात् सूर्यार्घ्यप्रार्थ
म्यं तु विष्णुपुराणपद्मपुराणयोर्व्यक्तमेव नृसिंहपुराणे ब्रह्मयज्ञानंतरमुक्तम् ततोर्घं भानवे दद्यात्तिलपुष्पजलान्वितम् उत्थाप्य मूर्द्धपर्यंतं
हंसः शुचिषदित्यृचा जलं देवं नमस्कृत्य ततो गृहगतः पुमान् विधिना पुरुषसूक्तस्य तत्र विष्णुं समर्चयेत् वैश्वदेवं ततः कुर्याद्बलिकर्म यथाविधि

अथ वैश्वदेवबलिकर्मणी तत्र वाजसनेयिगृह्यम् वैश्वदेवादन्नादुद्धृत्य पर्युक्ष्य स्वाहाकारैर्जुहुयात् ब्रह्मणे प्रजापतये गृह्येभ्यः
कश्यपायानुमतये इति भूतगृह्येभ्यः मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै धात्रे विधात्रे च द्वार्ययोः प्रतिदिशं वायवे दिशां च मध्ये त्रीन्
ब्रह्मणे न्तरिक्षाय सूर्याय विश्वेभ्यो भूतेभ्यस्तेषामुत्तरतः उषसे भूतानां पतये चापरं पितृभ्यः स्वधा नमः इति दक्षिणतः पात्रं निर्णि
ज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्ते इति वैश्वदेवादित्यन्नव्यपदेशः विश्वेदेवा कबलिसंबंधात् यद्यपि देवनांतरमपि वक्ष्यति तथाप्ये
कदेशेन व्यवहारः अत एव होमेप्यस्मिन् वैश्वदेवपदम् गौतमादिकल्पे होमेपि विश्वेदेवसंबंधात् अन्नाद्गृहीत्वेति शेषः पर्युक्ष्य अ
भिनमिति शेषो विष्णवादिसंवादात् एवं पर्युक्षण स्वाहाकारस्य च होमसामान्यधर्मत्वयोक्तस्यापि पुनरुपादानः एष एव विधिर्यत्र क्वचिद्धो
मइत्यत्र ग्रंथे इतरसामान्यधर्मनिषेधार्थं ब्राह्मण इत्यादीनां प्रत्येकं होमदेवतानिर्देशः अनुमतय इति कारे होमसमाप्त्यर्थः त्रीन्बली
निति शेषः भूतगृह्यविवरणे पर्जन्यायाद्भ्यः पृथिव्यैः इतित्रितयदैनैव बलिदानमिति सिध्यति द्वार्ययोर्द्वारदक्षिणवामप्रदेशयोः प्र
तिदिशं गृहस्य पूर्वदक्षिणपश्चिमोत्तरासु दिक्षु दिशामासामेव च कारान्मानिदिशमिति संबंध्यते मध्ये गृहस्य ब्रह्मण इत्यादित्रयं त्रीनि
त्यत्र देवताभिधायकम् तेषां ब्रह्मादिबलीनामुत्तरत उत्तरस्यां दिशि अपरमंतिमं नेन विश्वेदेवादिबलय उत्तरस्यां दिशि उत्तरेणत्तरं दानत्वे
इति सिध्यती उत्तरापराधायवी दिक् अत्र वदंती अयं विधिः साग्नेरेव अनग्नेर्गौनमेनोक्तो होमः शाकल एव च अनाहिताग्नेरप्येष यु
ज्यते बलिभिः सहेति वाक्ये निरग्नेः प्रकारान्तराभिधानात् न च छंदोगपरिशिष्टे श्रवणाच्छंदोगविषयं प्रकारांतरं सर्वशाखाप्रत्ययमेकं क
र्मेति न्यायेन सर्वगोचरत्वात् किंच यदियं छंदोगविषयं तदा निरग्निवाजसनेयिनां वैश्वदेवो न स्यादेवप्रापकाभावात् किंच मणिके त्रीनि

तिश्रवणान्निरग्नेश्चमणिकाभावात्साग्निविषयतेतितदयुक्तम् वैश्वदेवंप्रकुर्वीतस्वशाखाविहितंनर इतिव्यासवाक्यात्पारशाखिकवैश्व
देवानुष्ठानायोगात् किंचयद्यपिसर्वशाखाप्रत्ययमेकंकर्मतथापिस्वशाखाविहितंकर्मविहायनान्यशाखीयानुष्ठानम् यत्तुकर्मस्वशा
खायांनविहितंस्वशाखाविहितोविरुद्धंनतत्पारशाखिकमप्यनुष्ठेयं तदुक्तंछंदोगपरिशिष्टे स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंचयः कर्तुमि
च्छतिदुर्मेधामोघंतत्तस्यचेष्टितम् यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदितिशाखोक्तोयंवि
शेषःगृह्योक्तोयमितिचेत् नस्वशाखाश्रयमितिस्वशाखानुगतमात्रत्वविवक्षितत्वात् बह्वृचगृह्योक्तं यस्ययत्कर्मकीर्तितम् तस्य
तावतिशास्त्रार्थेकृतेसर्वंकृतंभवेत् इतिगृह्यपरिशिष्टेतत्राणिविशेषविधानाच्च तस्मान्निरग्निवाजसनेयिनामपिस्वगृह्योक्त एवकल्प
इतिमणिकस्योदपात्रस्यचलौकिकत्वादनग्निनाप्युपादानमस्तु अनग्निपक्षेवाउदकुंभएवास्तु अभ्यउदकुंभइतिगोतमाभिधानात्
उदपात्रमात्रोपलक्षणंवामणिकपदम् उदपात्रसन्निधावित्यापस्तंबवचनात् नचप्रापकाभावः सामान्यविधेरेवप्रापकत्वात् तथाचो
द्वाहानंतरंसंवर्तः ततःपंचमहायज्ञान्कुर्यादहरहर्द्विजः नहापयेततान्प्राज्ञः श्रूयंतेहिश्रुतावपि शतपथश्रुतिः पंचैवमहायज्ञास्तान्येव
महासत्राणि भूतयज्ञोमनुष्ययज्ञःपितृयज्ञोदेवयज्ञोब्रह्मयज्ञइत्यहरहर्भूतेभ्योबलिंहरेत् तथैतंभूतयज्ञंसमाप्नोत्यहरहर्दद्यादुदपात्रा
त्तथैतंमनुष्ययज्ञंसमाप्नोत्यहरहःस्वधाकुर्यादुदपात्रात्तथैतंपितृयज्ञंसमाप्नोत्यहरहःस्वाहाकुर्यादाकाष्ठात्तथैतंदेवयज्ञंसमाप्नोत्यथ
ब्रह्मयज्ञःस्वाध्यायोवैब्रह्मयज्ञस्तस्यवाएतस्यब्रह्मयज्ञस्यवागेवजुहूर्मनउपभृच्चक्षुर्ध्रुवामेधास्रुवःसत्यमवभृथःस्वर्लोकउदयनंयाव
तंहवाइमांपृथिवींवित्तेनपूर्णांददल्लोकंजयतित्रिस्तावंतंजयतिभूयांसंवाक्षय्यंयएवंविद्वानहरहःस्वाध्यायमधीतेतस्मात्स्वाध्यायोध्येतव्यः

आ०
द०
३३

मनुः पंचसूनागृहस्थस्य चूल्ही पेषण्युपस्करः कंडनी चोदकुंभश्च बध्यते यांस्तु वाहयन् तासां क्रमेण सर्वासां निःकृत्यर्थं महात्मभिः पंचक्लृ
प्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं सूना प्राणिवधस्था
नं उपस्करः संमार्जनी गृहोपकरणं भांडकुंभांडादीत्यपरे बध्यते हंतीत्यर्थे आर्षत्वात् अथवा बध्यते हिंसाजन्यदुरितेन संबध्यते वेत्यर्थः
वाहयन् प्रवर्तयन् तासामित्यादिना एतत्पापक्षयार्थं पंचमहायज्ञा इत्युक्तम् एतच्चार्थवादमात्रम् श्रुतावहरहः श्रुतेर्जीवदधिकारएवग
मात् अत्रापि प्रत्यहमिति श्रवणाच्च अथवा अर्थवादात्सूनाजनितपापक्षयोपि एवं च स्वर्गापवर्गयोः सिद्धिं पाकयज्ञैः प्रचक्षत इति
व्यासादपि फलांतरमिति प्रत्येकमपि फलमस्ति तथा च हारीतः यद्देवेभ्यो जुहोति देवलोकं तेन जयति यत्पितृभ्यो ददाति पितृलो
कं तेन जयति यत्स्वाध्यायमधीते ऋषिलोकं तेन जयति यद्भूतेभ्यो बलिं हरति तेन भूतलोकं जयतीति मनुश्च धन्यं यशस्यमायुष्यं
स्वर्ग्यं चातिथिपूजनम् पितृयज्ञप्रकारांतरं छंदोगपरिशिष्टे श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरेव वा पंचयज्ञप्रकारांतरमाहुर्मनु
विष्णुदेवलाः देवतातिथिभूतानां पितृणामात्मनश्च यः न निर्वपति पंचानामुच्छ्वसन्न स जीवति तदेषां वाक्यानां सामान्यविषयतया।
साग्निनिरग्निगृहस्थमात्रविषयमेव न च मन्वादिभिर्वैश्वदेवहोमे आवसथ्याग्निविधानादनग्नेरनधिकारः लौकिके वैदिके वापि
हुतोच्छिष्टे जले क्षितौ वैश्वदेवं प्रकुर्वीत पंचसूनापनुत्तये इति शातातपेनाधारांतरस्यापि विहितत्वात् वैदिके आवसथ्याग्नौ हुतोच्
छिष्टे अनेन होमं कृत्वा तत्पक्ते अंगिराः शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते इति
अस्यार्थः साग्निना पाको होमश्चावसथ्याग्नावेव कर्तव्यः निरग्निना लौकिक इति छंदोगपरिशिष्टे पाण्याहुती द्वादशपर्वपूरिका द्वा

एम:
३३

दिनाचेत्स्रुवमात्रपूरिका दैवेननीर्थेन चहूयते हविः स्वंगारिणि स्वर्चिषि तच्च पावके तथाहविष्येषु यवा मुख्यास्तदनुव्रीहयः स्मृताः माष
कोद्रवगौरादीन्सर्वाभावेपिवर्जयेत् गौरः सितसर्षपः आदिपदेन चणकमाषमसूरकुलत्थोद्दालकम्पमिति शंखलिखितोक्तपरिग्रहः
आपस्तंवः नक्षारलवणंहोमेविद्यते तथापरान्नसंसृष्टस्य चहविष्यस्य चहोमः तथा नस्त्रीजुहुयान्नानुपनीतः एतत्साग्नेः प्रवासे कृतलि
गस्सन्निधानेसति अन्यत्रप्रसक्त्याभावात् निरग्नेस्तु स्वकर्तृक एववैश्वदेवः तथा आर्याः प्रयताः वैश्वदेवान्नसंस्कर्तारः भाषाका
संक्षवथूमित्यभिमुखोन्नंवर्जयेत् केशानंगवासश्चालभ्याप उपस्पृशेत् आर्यास्त्रैवर्णिकाः आपस्तंवः भोजनंदेवनंदानमुपहारः प्रतिग्रहः
वहिर्जानुनकार्याणि नहृदाचमनंस्मृतम् छंदोगपरिशिष्टम् जुहूयुश्चहुतेचैव पाणिस्रूर्प्यस्फ्यदारुभिः नकुर्यादग्निधमनं कुर्याद्वा व्यंजना
दिभिः मुखेनैवधमेदग्निं मुखादेषव्यजायत नमुखेनेतियच्चोक्तं लौकिके योजयंतितत् वायुपुराणे दानंप्रतिग्रहोहोमोभोजनं वलिरेवच
सांगुष्ठेन सदाकार्यमासुरोह्यन्यथाभवेत् याज्ञवल्क्यः देवेभ्यश्चहुतादन्नाच्छेषाद्भूतवलिंहरेत् अन्नंभूमौश्वचांडालवायसेभ्यश्च
निक्षिपेत् श्वादिवलीनां पृथक्निर्देशाद्भूतयज्ञवहिर्भावः ब्रह्मादितीर्थाधिकारे हारीतः मार्जनार्चनवलिकर्मभोजनादिदैवेन छं
दोगपरिशिष्टे नावराध्यावलयोभवंति महामार्जारश्रवणप्रमाणत् एकत्रचेदविप्रकृष्टाभवंति इतरेतरासंयुक्ताश्च अवराध्यान्यूनाः
एकत्रचेत्यादिनानानास्थानेवलिदानासंभवे एकस्मिन्नेवस्थानेयदावलयोदीयंते तदा अविप्रकृष्टा अव्यवहिता इतरेतरासंयुक्ता
श्चपरस्परासंयुक्ताश्चदातव्या इत्यर्थः अस्मिन्नपिपक्षे धात्रादिवलिषुद्वारादिकल्पनीयम् आपस्तंवः वलीनां तस्यतस्यदेशस्यसं
स्कारोहस्तेनपरिमृज्यावोक्ष्याभ्युक्ष्यपश्चात्परिषेचनं तस्यतस्येत्यावृत्तेः प्रत्येकं मार्जनादि अवोक्ष्य सिक्त्वानुपलिप्य वलिंदत्वा परिषे

आ॰
८०
३४

चनम् वलेस्तु परिषेकः वलीनुत्का छंदोगपरिशिष्टे पिंडवत्सव्यमाप्रतिपत्तिः पिंडवदग्न्यादिप्रक्षेपणं पश्चिमा अंतिमा यत्तु पश्चिमाप्रतिप
त्तिः पितृवलिप्रतिपत्तिरितिव्याख्यानं तदशुद्धं सर्ववलिप्रतिपत्त्याकांक्षाया विद्यमानत्वात् स्त्रीलिंगानुपपत्तेः षष्ठीसमासे लक्षणापत्तेश्च
तथामुष्मै नमइत्येवं वलिदानं विधीयते तथा स्वधाकारेण निर्वपेत् पित्र्यं वलिमतः सदा तदप्येके नमस्कारैः कुर्वते नेति गोतमः एक इति शाखां
तराभिप्रायम् अत एव स्वधा नम इति वाजसनेयिगृह्ये नमस्कारोपि पठितः नेति गोतम इति छंदोगानां नमस्कारनिषेधः तथा सायं प्रातर्वैश्व
देवः कर्तव्यो वलिकर्म च अनश्नतापि सततमन्यथा किल्बिषी भवेत् सायमिति पुनः पाके सति तथा च विष्णुपुराणे॰ पुनः पाकमुपादाय सा
यमप्यवनीपते वैश्वदेवनिमित्तं वै पत्न्यामंत्रं वलिं हरेत् तत्रापि श्वपचादिभ्यस्तथैवान्नविसर्जनम् मनुः सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं वलिं
हरेत् इदं पत्नीकर्तृक वलिहरणं यजमानानुपस्थितौ अत्र भ्रात्रादीनामविभक्तानां विभक्तानामपि संसृष्टानां मुख्येनैकेनैव पाकयज्ञाः
कर्तव्याः यदाह एकपाके निवसतां पितृदेवद्विजार्चनम् एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे एकपाके निवसतामित्युपक्रम्य संसृष्टा
नामित्यभिधानाद्विभक्तानामिति द्रष्टव्यम् पार्थक्यपरं देवार्चनं मंत्र वैश्वदेवः अत्र होमात्प्राक् स्रग्गंधादिना वह्निपूजनं कर्तव्यम् एतदुक्तं मार्क
ण्डेयपुराणे संपूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमादिति अथ प्रयोगः पर्युक्षिते समिद्धेग्नौ तदभावे जले तदभावे भूमौ पाकादन्नमुद्धृत्य
फलमूलादिना वा पंचाहुतीर्जुहुयात् ॐ ब्रह्मणे स्वाहा ॐ प्रजापतये स्वाहा ॐ गृह्याभ्यः स्वाहा ॐ कश्यपाय स्वाहा ॐ अनुमतये स्वाहा
ततो हुतशेषान्नेन वलिदानं तत्र प्रत्येकं वलिदशानुक्रमेण मार्जयित्वा जलेनाभ्युक्ष्य ॐ पर्जन्याय नमः ॐ अद्भ्यो नमः ॐ पृथिव्यै नमः
इत्युदपात्रसन्निधौ ॐ धात्रे नमः ॐ विधात्रे नमः इति द्वार्ययोः ॐ वायवे नमः इति प्रतिदिशं ॐ प्राच्यै नमः ॐ अवाच्यै नमः ॐ प्रतीच्यै नमः

ॐ उदीच्यै नमः इत्यपि प्रतिदिशं ॐ ब्रह्मणे नमः ॐ अंतरिक्षाय नमः ॐ सूर्याय नमः इति मध्ये ॐ विश्वेभ्यो देवेभ्यो नमः ॐ विश्वेभ्यो भूतेभ्यो नमः
ॐ उषसे नमः ॐ भूतानां पतये इत्युत्तरेत्तरम् ततः प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुः पितृतीर्थेन दक्षिणस्यां दिशि ॐ पितृभ्यः
स्वधा नमः इति दद्यात् ततो बलिशेषान्नलिप्तपात्रं प्रक्षाल्य यक्ष्मैतत्ते निर्णेजनं नमः इति वायव्यां दिशि दद्यात् गृहद्वारादौ बलिदानासंभवे
अग्नेः पश्चिमतश्चतुरस्रमंडले धात्रादिबलिदानं मत्स्यबल्यनंतरं विष्णुपुराणे ततोऽन्यदन्नमादाय भूमिभागे शुचौ पुनः दद्यादशेषभूतेभ्यः
स्वेच्छया तु समाहितः देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मया प्रदत्तम्
पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मनिबद्धबद्धाः प्रयांतु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवंतु येषां न माता न पिता न बंधुर्नै
वान्यसिद्धिर्न तथान्नमस्ति तत्तृप्तयेऽन्नं भुवि दत्तमेतत्ते षां तु तृप्तिर्मुदिता भवंतु भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न यतोऽन्यदस्ति तस्मा
दहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसंघाः तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामि
दं ते मुदिता भवंतु इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः भुवि भूतोपकाराय गृही सर्वाश्रयो यतः श्वचांडालविहंगानां भुवि दद्यात्ततो नरः
इदं च काम्यबलिदानं सर्वेषामविसाधारणं बहुभिरभिधानाच्च मनुः शुनां च पतितानां च श्वपचां पापरोगिणां वायसानां कृमीणां च शनकै
र्निक्षिपेद्भुवि व्यासः ऐंद्रवारुणवायव्याः सौम्या वैनैर्ऋतास्तथा वायसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितम् श्वानौ द्वौ श्यावशबलौ वैवस्वत
कुलोद्भवौ ताभ्यां पिंडं प्रयच्छामि स्यातामेतावहिंसकौ दत्वानेन विधानेन बलिं पश्चादुपस्पृशेत् वायसादिभ्यो भूमौ दत्वा ब्राह्मणान्भोजये
त्पित्रर्थबलिदानानंतरं वसिष्ठः श्रोत्रियायाग्रं दत्वा ब्रह्मचारिणे चानंतरं पितृभ्यो दद्यात् एतच्च तस्मिन्काले श्रोत्रियब्रह्मचारिणोरुपस्थितौ

नो चेत्पूर्ववाक्याद्दत्त्वानंतरमेव श्राद्धम् अथ नित्यश्राद्धम्० भविष्यपुराणे० अहरहः क्रियते यत्तु तन्नित्यमिति कीर्त्यते विश्वेदेवविहीनं तद्दश
क्तावुदकेन तु विश्वेदेवविहीनं विश्वेदेवश्राद्धरहितम् मनुः शंखशातातपाः दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा पयोमूलफलैर्वापि पितृ
भ्यः प्रीतिमावहन् छंदोगपरिशिष्टे अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये इति तथा अप्युद्धृत्य यथाशक्त्या किंचिदन्नं यथाविधि पितृभ्यो
थ मनुष्येभ्यो दद्यादहरहर्द्विजः पितृभ्य इदमित्युक्त्वा स्वधाकारं च कारयेत् मनुष्येभ्यो ब्राह्मणेभ्यः पितृभ्य इदमित्युक्त्वा मिलितदेवताकत्वं
नित्यश्राद्ध इति केचित् मत्स्यपुराणे० नित्यं तावत्प्रवक्ष्यामि अर्घावाहनवर्जितमिति लघुहारीतः नित्यश्राद्धमदैवं स्यादर्घपिंडविवर्जितमिति
ब्रह्मचर्यादिनिवृत्तिराचारात् अथ प्रयोगः अद्य नित्यश्राद्धमहं करिष्ये इति वाक्यं कृत्वा गायत्रीं देवताभ्य इति त्रिर्जपित्वा पुंडरीकाक्षस्मरणे
न श्राद्धद्रव्याणि सिक्त्वा अद्यामुकगोत्र पितरमुकशर्मन्निदमासनं ते स्वधेति प्राचीनावीती पातितवामजानुः पितृतीर्थेन जलतिलसमेतं द्वि
गुणभुग्नकुशत्रयेणापि त्रे दद्यात् एवमेव पितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यः आसनं दद्यात् ततोऽपहता असुरा
इत्यादिना तिलान्विकीर्य आपंतु न इति जपित्वा ॐ अद्यामुकगोत्र इत्यादि पूर्ववत् एतानि गंधपुष्पधूपदीपवस्त्राणि तुभ्यं स्वधेति यथासंभ
वं गंधादि दद्यात् ततः पात्रमालभ्य पृथिवी ते पात्रमित्यादि जपित्वा इदं विष्णुरित्यादिनांगुष्ठमन्ने संयोज्य ॐ अद्यामुकगोत्र पितरमुकश
र्मन्निदमन्नं सव्यंजनं सतिलं तुभ्यं स्वधेत्युत्सृजेत् एवं पितामहादिभ्यः प्रत्येकमुत्सृजेत् ततो यथाशक्ति पवित्रान् जपेत् ततस्तदन्नं ब्राह्मणा
य प्रतिपादयेत् ब्राह्मणोपवेशनपक्षे स्वागतप्रश्नाद्यधिकमिति प्रयोगः अथ भिक्षादानम् भिक्षादानं तु यद्देवयति ब्रह्मचारिणो ह्युपस्थिते तद्वैवकर्त
व्यं नृसिंहपुराणे भिक्षां च भिक्षवे दद्यात्परिव्राड्ब्रह्मचारिणे कल्पितादन्नादुद्धृत्य सव्यंजनयुतादपि अकृते वैश्वदेवे तु भिक्षौ च गृहमागते उद्धृत्य वैश्वदेवा

र्थं भिक्षां दत्वा विसर्जयेत् गौतमः स्वस्तिवाच्य भिक्षादानमपूर्वं मार्कंडेयपुराणे ० ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयं अग्रा च्चतुर्गुणं प्राहुर्हंतका
रं द्विजोत्तमः भोजनं हंतकारं वा अग्र भिक्षामथापि वा अदत्वा तु न भोक्तव्यं यथाविभवमात्मनः अग्रं पुष्कलसंज्ञमपि विष्णुपुराणे दद्याच्च भिक्षा
त्रितयं परिव्राड् ब्रह्मचारिणे स्वेच्छया च वधो दद्याद्विभवे सत्यवारितम् पाखंडानुपक्रम्य ब्रह्मपुराणे तेभ्यो देयं गृहाद्बहिः विष्णुः भिक्षां च भिक्ष
वे दद्यादर्चितभिक्षादानेन गोप्रदानफलमवाप्नोति भिक्षुकाभावे चाग्रं गोभ्यो दद्यात् अग्नौ वा क्षिपेत् भुक्तेप्यन्ने विद्यमाने भिक्षुकं न प्रत्या
चक्षीत ब्रह्मपुराणे यः पात्रपूरणीं भिक्षां यतिभ्यः संप्रयच्छति विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात् यमः हस्तदत्ता च या भिक्षा व्यंजनं स
लिलानि च भुक्त्वा त्वशुचितां यांति दाता स्वर्गं न गच्छति देवलः सायंप्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत् भिक्षुकवारणार्थं द्वारं नावरुंध्यादित्य
र्थः अथ गोग्रासः ब्रह्मपुराणे सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः दद्यादनेन मंत्रेण गवां ग्रा
सं स दैवहि सदैव हीत्युक्तिर्नित्याधिकारः भारते घासमुष्टिं परगवे सान्नं दद्याच्च यः सदा अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति अकृत्वा
स्वयमाहारमिति श्रवणाद्भोजनात्प्राक् ग्रासदानं न तु तत्र काल नियमः फलश्रवणाच्चात्र सकामाधिकारोपि भविष्यपुराणे तृणोदकेन सं
युक्तं प्रदद्याच्च गवाह्निकं कपिलाशनदानस्य फलं विंद्यान्न संशयः पंचभूते शिवे पुण्ये पवित्रे सूर्यसंभवे प्रतिक्ष मंमया दत्तं सौरभेयि नमोस्तु ते
गवाह्निकं गवां यदन्हा भुज्यते पंचभूत इत्यादिना गवाह्निकदानमंत्रः गोग्रासदानमंत्रस्तु सौरभेय्य इत्यादि प्रागुक्तः अथातिथिपूजा तत्र व
सिष्ठः पितृभ्यो दद्यात्ततोऽतिथीन्पूजयेत् एवं चात्र नित्यश्राद्धानंतरमतिथिपूजाविधानात् स्मृत्यंतरे वैश्वदेवात्प्रागागतोऽपि नातिथिरित्यवपा
तथा च पराशरः ज्ञाता न पो प्रियो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा वैश्वदेवे तु संप्राप्तः सोतिथिः स्वर्गसंक्रमः हारीतः सर्वा अस्य देवता गृहानभ्याग

आ० द० ३६

छंति यस्यैवंविद्वान्ब्राह्मणो गृहमध्येतितमनभ्युत्तिष्ठतः प्राणदेवता अपक्रामंति अत्र बृहस्पतिः प्रीतये स्वागतेनाग्निरासनेन शतक्रतुः पि
तरः पादशौचेन भोजनेन प्रजापतिः शातातपः भिक्षां वा पुष्कलं वापि हंतकारमथापि वा असंभवे सदाद्यादुदपात्रमथापि वा पारस्करः उद्
त्यान्नं ब्राह्मणायावनेज्य दद्यादुदकं नत इति एवं चातिथ्यभावे अन्नेनापि ब्राह्मणेन मनुष्ययज्ञसिद्धिः अभ्यागतानुवृत्तौ वसिष्ठः नभोजयि
त्वोपासीत नतेनागच्छंतमासीमांतमनुव्रजेदनुज्ञानाद्वा आपस्तंबः यानवंतमायानाद्यावन्नानुजानीयादितरमाप्रतिभायामासीमान्तो निव
र्तेत इतरं यानशून्यं अप्रतिभायामनुज्ञानास्फूर्तौ विष्णुपुराणे० अनिकेता ह्यनाहारा ये च सायं गृहागताः तेषां गृहस्थः सर्वेषां प्रतिष्ठायो
निरेव च प्रतिष्ठा आश्रयः योनिरन्नादिदानेन जीवनहेतुः तथा दिवातिथौ तु विमुखे गते यत्पातकं नृणाम् तदेवाष्टगुणं पुंसां सूर्योढे वि
मुखे गते सूर्योढः सूर्यास्तमयसमयः विष्णुः प्रतिश्रयं तथा शय्यां पादाभ्यंगं सदीपकं प्रत्येकदानेनाप्नोति गोप्रदानसमं फलम् प्रतिश्रयो
वासगृहं मनुः आशनाशनशय्याभिरद्भिर्मूलफलेन वा नास्य कश्चिद्वसेद्गेहे शक्तितोनर्चितोतिथिः आपस्तंबः एकरात्रिं चेदतिथिं वास
येत्पार्थिवान् लोकानभिजयति द्वितीययांतरिक्षान् तृतीयया दिव्यान् चतुर्थ्या परतो लोकान् अपरिमिति परिमितान् जयति इति प्रत्यभिज्ञा
यत्ते यमः नपृच्छेद्गोत्रचरणं देशं नामकुलं श्रुतं अध्वनोभ्यागतं विप्रं भोजने समुपस्थितं चरणं शाखाविशेषाः न्मवस्थितेः तथा देशं गोत्रं कु
लं विद्यामन्नार्थी यो निवेदयेत् वैवस्वतेषु धर्मेषु वांताशी स निगद्यते तथा अपि शाकं पचानस्य शिलोंछेनापि जीवतः स्वदेशे परदेशे वाना
तिथिर्विमना भवेत् मनुः तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता एतान्यपि सतां गेहे नोच्छिद्यंते कदाचन तथा वैश्वदेवे तु निर्वृत्ते यद्यन्यो
तिथिराव्रजेत् तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् वैश्वदेवो होमाद्यर्थपाके वैश्वदेवस्यासिद्धस्येतादो दर्शनात् निर्वृत्ते अर्पितेन बलिं हरेत्

रामः ३६

अतिथ्यर्थं पुनः पाके केवलबलिहरणनिषेधः केचिद्याचक्षते वैश्वदेवहोमान्तेऽतिथ्यन्तरोपस्थितौ तस्मै दत्वा बलिहरणं न कर्तव्य
मित्यर्थः तदयुक्तं बलिहरणात्पूर्वमतिथ्यन्नदाने नस्मृत्यंतरविरोधात् अन्नाल्पत्वे बलिहरणविरोधेऽप्यतिथये अन्नदानमित्यपि नव्याख्यानं
युक्तं न बलिहरणे दत्तविशेषितश्रवणात् अत एव बलिमपि न हरेदिति स्मृतिरिति व्याख्यापेक्षा अप्यार्थो ह्याहारदोषाच्च पराशरशातातपौ
अतिथिं तमनाहूतं देशकाल उपस्थितं अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः देश उपस्थितं गृहे विद्याद्गार्यायत्रापि वनि मनु विष्णु
शातातपैरुक्तः कालो वैश्वदेवोत्तरः प्रागुक्तः याज्ञवल्क्यः अध्वनीनोऽतिथिर्ज्ञेयः गौतमः असमानग्रामीणोऽतिथिरेकरात्रिकः एकरात्रि
कत्वं हि नामतः पूर्वं तु द्वितीयदिनादावपि वासनं फलार्थमुक्तम् आपस्तम्बः धर्मपुरस्कारो नान्नप्रयोजकः सोऽतिथिर्भवति धर्मपुरस्कार
स्तीर्थयात्रादिः प्रवृत्तस्तत्रातिथिरेव संबध्यते अत्र प्रयोजको भोजनार्थमटनशीलः मनुः ब्राह्मणस्य त्वनतिथिर्गृहे राजन्य उच्यते वैश्य
शूद्रौ सखा चैव ज्ञातयो गुरुरेव च यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् भुक्तवत्सु तु विप्रेषु कामं तमपि भोजयेत् वैश्यशूद्रावपि प्राप्तौ कु
टुंबेऽतिथिधर्मिणौ भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजनं इतरानपि सख्यादीन्सप्रीत्या गृहमागतान् प्रकृत्यान्नं यथाशक्ति भोजयेत्सह भा
र्यया कुटुंबे गृहे आनृशंस्ये दया प्रकृत्य पत्न्या सह भार्यया सहितः बौधायनः सायं प्रातर्यदन्नं स्यात्तेनैव वैश्वदेवबलिमुपसंहृत्य ब्राह्मण
क्षत्रियविट्शूद्रानभ्यागतान्यथाशक्त्या पूजयेत् यदि बहूनां न शक्नुयात्तदा एकस्मै गुणवते दद्यात् यो वा प्रथममागतः स्यात् गौतमः ऋत्
त्विक्श्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्कः संवत्सरे पुनः यज्ञविवाहयोरर्वाक् राज्ञश्च श्रोत्रियस्याचार्यस्य अश्रोत्रियस्यासनोदके
तथा श्रोत्रियस्य पाद्यमर्घमन्नविशेषांश्च प्रकारयेत् नित्यं वा सत्कारविशिष्टमध्यतोऽन्नदानमेवेध्वे साधुवृत्तो विपरीते तृणोदकभूमिस्वागत

आ० द० ३७

मन्नतः पूज्ञानस्यासस्य श्रोत्रियोवेदानामेकैकांशाखामधीत्यश्रोत्रियोभवतीत्यापस्तंबोक्तेः नित्येंयादृशमहरहर्गृहेपच्यते मध्यतोमध्य
विधादरेण अवैधेमूर्खेविपरीतेऽसाधुवृत्तेअनत्यासोऽनतिक्रमः आपस्तम्बः ब्राह्मणायानधीयानायासनमन्नमुदकमितिदेयंनप्रत्यु
पतिष्ठेताऽभिवादनायोत्तिष्ठेनअभिवाद्यश्चेत् राजन्यवैश्योचशूद्रमभ्यागतंकर्मस्तुनियुंज्यात् अथास्मैदद्यात् राजन्यवैश्योचेतिनप्रत्युत्ति
ष्ठेदित्यनुषंगः तथासर्वान्वैश्वदेवभागिनः कुर्वीतश्वचांडालेभ्योवानानर्हद्भ्योदद्यादित्येकेनानर्हद्भ्य इतिनिषेधान्नेभ्योदानमनावश्यकम् अपि
कीटपतङ्गानांश्वुनांचाण्डालयोनिनां दत्वान्नंलोकमाप्नोतिप्राजापत्यंसमाः शतमिति नंदीपुराणात् फलार्थत्वस्यैवावगमात् जाबालिः
अस्नाताशीमलंभुंक्ते अजपीपूयशोणितम् अहुत्वानुकृमिंभुंक्ते अदत्वाविड्भोजनं अघंसकेवलंभुंक्तेयः पचत्यात्मकारणात् इंद्रियप्री
तिजनकंवृथापाकंविवर्जयेत् शंखलिखितौ नभोजनार्थीपाकशालांप्रविशेत् नंदीपुराणे यतेनब्राह्मणंपूर्वंभोक्तुमन्नंसदागृही देवलः
नाघृतंभोजयेद्विप्रंस्वगृहेसतिसर्पिषि परपनिरयंघोरंगृहस्थः प्रतिपद्यते मिष्टमन्नंस्वयंभुक्त्वापश्चात्कदशनंलघु ब्राह्मणंभोजयेन्मूर्खोभू
निरयेचिरमाविशेत् वसिष्ठः महायज्ञंयथाशक्तिसर्वदासर्वभूतानिगृहस्थएवयजते गृहस्थस्तप्यतेतपः चतुर्णामाश्रमाणांतुगृहस्थस्तुवि
शिष्यते महायज्ञान्पूजयेत् पैठीनसिः चत्वारोह्याश्रयाः ब्रह्मचारीगृहस्थोवानप्रस्थोभिक्षुश्चेतिसर्वेगृहस्थमूलास्तदुपजीविन इतिगृहस्थ
मूलागृहस्थस्यैवपूज्योपादानाधिकारित्वात् दक्षः देवैश्चैवमनुष्यैश्चतिर्यग्भिश्चोपजीव्यते गृहस्थः प्रत्यहंयस्मात्तस्माज्ज्येष्ठोगृहाश्रमी
याज्ञवल्क्यः बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः संभोज्यातिथिभृत्यांश्चदंपत्योः शेषभोजनं दक्षः पंचमेचतथाभागेसंविभागोय
थार्हतः देवपितृमनुष्याणांकीटानांचोपदिश्यते संविभागंततःकृत्वागृहस्थः शेषभुग्भवेत् संविभागोविभज्यप्रतिपादनम् अथभोजनविधिः

तत्र बौधायनः सुप्रक्षालितपाणिपादोऽप आचम्य शुचौ संवृते देशे अन्नमुपसंगृह्य काममक्रोधलोभमोहानपहत्य सर्वाभिरंगुलीभिः शब्द
मकुर्वन् प्राश्नीयात् ब्रह्मपुराणे आसनस्थस्तु यो दर्पात्तिक्तिमध्य उपस्पृशेत् स सर्वेषां तु यत्पापं तदश्नाति नराधमः तस्माद्द्विहिरूपस्पृश्य
आचांतः प्रविशेद् गृहं तथा पात्रेषु यथानुरूपेषु पुत्रभृत्यानुजैः सह भूम्यां पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्षयेत् पवित्रपाणिः पुण्यं च लभेत त्र्या
घमर्षणम् अघमर्षणजन्यपुण्यमिति सामानाधिकरण्यम् लभेत जपेदित्येके तन्मते नाघमर्षणं मुख्यमेव विष्णुपुराणे॰ विशुद्धवदनः प्री
तो भुंजीत न विदिङ्मुखः विदिङ्मुखः आग्नेयीनैर्ऋतीवायव्यैशान्यभिमुखः हारीतः नोदङ्मुखो नाधिशयने आसने अश्नीयात् अधिउ
परिशयने शय्यायाम् आसने पीठादौ अन्नं कृत्वेति शेषः वामनपुराणे भुंजीत नोदङ्मुखो न च दक्षिणामुखो न च प्रतीचीमभिभोजनीयम्॥
एते उदक् दक्षिण प्रत्यङ्मुख निषेधा निष्कामस्य तथा च मनुः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते
उदङ्मुखः श्रियमृतमित्युभयत्र काममयमाम इति शेषः ऋतं सत्यं यज्ञं वा दक्षिणामुखभोजनप्रमीतमातृविषयम् तथा चापस्तंबः न दक्षिणा
मुखो भुंजीत अनायुष्यत्वे वै मुख्यस्य भोजनं मातुरित्युपदिशंति प्राङ्मुखोन्नानि भुंजीत पंचार्द्रो वाग्यतः शुचिः आर्द्रपादस्तु भुंजानः शतं व
र्षाणि जीवति पंचार्द्रः पादद्वये करद्वये मुखे च पुनरार्द्रे पादोपादानं फलार्थम् शंखः चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु मंडलाकृ
ति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् ब्रह्मपुराणे चतुरस्रं त्रिकोणं च मंडलं चार्द्धचंद्रकम् कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलम् ब्रह्मरुद्रेंद्र
चन्द्रार्कवसवो मंडलानराय निवेदितं नरैरन्नं यस्माद्धृत्वा हरंति नाम्नया एवं ब्रह्मादीनां भोजनकाले बलिर्देयः मंडलार्थवादमात्रमेतदिति वे
न तस्यापि सालंबनत्वात् असतार्थत्वेन स्तुतिरिति चेत् न असंभवे हि तथा स्यात् न चैवं वाक्यभेदः सूक्तवाक्यादविकल्पत्वात् विष्णुपुराणे॰

आ० द० ३८

प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही प्रशस्तरत्नं गारुडादि मनुः पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनंदेच्च
सर्वदा ब्रह्मपुराणे॰ वामेन पाणिना पात्रं गृहीत्वा भुवि संस्थितम् तेजोसीति जपन्नन्नं प्रणामेदमृतं च तत् विष्णुपुराणे॰ अन्नं प्रशस्तं पथ्यं च
प्रोक्षितं प्रोक्षणोदकैः ब्रह्मपुराणे॰ आपोशानं च गृण्हीयात्सर्वतीर्थमयं च यत् अमृतोपस्तरणमसीति विष्णोरन्नमयस्य च अस्तीत्यनंतरं
स्वाहाकारं कुर्वंति हस्तेन तं घयेन्मन्नं सोदकेन कदाचन तथा प्राणेभ्यस्त्वथ पंचभ्यः स्वाहाप्रणवसंयुताः पंचाहुतीः प्रजुहुयात्प्रलयाग्नि
निभेषितिप्राणाः प्राणापानव्यानसमानोदाना अत्रैव क्रमोक्ताः स्वाहाप्रणवसंयुताः स्वाहांताः प्रणवाद्याः ॐ प्राणाय स्वाहा ॐ अपानाय
स्वाहा ॐ व्यानाय स्वाहा ॐ समानाय स्वाहा ॐ उदानाय स्वाहा इत्येवं रूपाः प्रलयाग्निनिभेषिति ध्येयत्वार्थं याज्ञवल्क्यः प्राणो व्यानस्तथा
पानः समानोदान एव च ॐ कारपूर्वैः स्वाहांतैः पंच दद्यान्नयाहुतीः विष्णुपुराणे॰ पंच ग्रासान्महामौनं प्राणाद्याप्यायनाय तत् महामौनमिभि
ति सर्वथा ध्वनिनिवृत्तिरभिहिता प्राणापानसमानानामुदानव्यानयोस्तदा क्रमांतरेणोक्ताः एताश्चाहुतयो न दंतेन दंतेन भेद्याः प्राणाम
स्वाहेत्येकया हुत्या सर्वान्प्राणान्प्रीणातीति समस्तान्निगिरेदिति हारीताभिधानात् अंगुष्ठानामिकामात्रग्राह्या अन्नेनाहुतयइतिहारी
तव्याख्यानात् सर्वांगुलीभिरश्नीयादिति सामान्यविधेस्तु पंचग्रासस्थापितत्वेवस्तुहता च ग्रासानां गिलनसामर्थ्याल्लभ्यते विष्णुपुराणे॰ प्रज्ञा
ढ्यो ब्रह्मचारी स्यात् पक्वान्नैर्वै हुतैश्च सः प्राणाग्निहोत्रविद्धिम दानाच स्यात्समृद्धिमान् भोजनविद्व्यनंतरं बौधायनः स एवमेवाहरहः सा
यं प्रातर्जुहुयादिति प्राणाहुत्यभिप्रायम् तथा गृहस्थो ब्रह्मचारी वा यो नश्नंश्च तपश्चरेत् प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः अन्यत्र
प्रायश्चित्तात् प्रायश्चित्तेन देवविधानम् प्राणाग्निहोत्रमंत्रास्तु निरुद्धो भोजने जपेत् त्रेताग्निहोत्रमंत्रान्वैद्रव्यालाभे यथा जपेत् गृहस्थोत्रा

एमः ३९

हिताग्निः अनड्वान्ब्रह्मचारी च आहिताग्निश्चेते त्रयः अश्नन्त एव सिध्यंति नैषां सिद्धिरनश्नतामित्यापस्तम्बवचनात् प्राणाग्निहोत्रं।
प्राणाहुतिः त्रेता गार्हपत्याहवनीयदक्षिणाग्निरूपमग्नित्रयम् द्रव्यालाभेऽग्निहोत्रविहितद्रव्यालाभे मनुः सायंप्रातर्द्विजातीनामशनं
देवनिर्मितं नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः अंतराभोजननिषेधो मूलफलादन्यत्र तथा चापस्तम्बः दिवा च न भुंजीतान्यत्र फ
लमूलेभ्य इति चकारः पुनरर्थे छंदोगपरिशिष्टे ऋषिभिर्द्विरशनमुक्तं विप्राणामप्रवासिनां सततं नित्यमहनि च तथा तपस्विनां सार्द्धप्रह
रयामांतः अहनीति सति संभवे पंचमभागपरं दक्षदर्शनात् तपस्विनां रात्रौ सार्द्धप्रहरयामांतः अर्द्धप्रहरसहितप्रथमप्रहरे एवं च मन्वा
दावपि सायंप्रातश्चेत्तदनुसाराद्व्याख्येयम् अत्र हारीतः न कार्ष्णायसेन मृत्पात्रे न भिन्ने नावकीर्णे कार्ष्णायसे लोहपात्रे भिन्ने स्फुटिते अ
वकीर्णे शूद्रभोजनादिना पवित्रे मनुः न भिन्नभांडे भुंजीत न भावप्रतिदूषिते पैठीनसिः ताम्ररजतसुवर्णशंखमुक्ताफलभिन्नमिति न दोषः
अत्र विष्णुपुराणे नासंदीस्थितपात्रे आसंदी वेत्रादिनिर्मितमुच्चमासनम् अत्र विष्णुः न भुषिपाणौ लवणम् वसिष्ठः भार्यया सह नाश्नी
यादवीर्यवदपत्यं भवतीति वाजसनेयिके विज्ञायते ब्रह्मपुराणे ब्राह्मण्या भार्यया सार्द्धं क्वचिद्भुंजीत चाध्वनि असवर्णस्त्रिया सार्द्धं भुत्का पतति
न तु क्षणात् ब्राह्मणीपदं सवर्णोपलक्षणं आपस्तंबः न नाविभुंजीत तथा प्रासादे कृतभूमौ भुंजीत प्रासादे दारुबद्धे न लइत्याहुः कृतभूमौ
मृदादिप्रक्षेपेण संपादितभूमौ नाविप्रासादे वहारीतः न क्रुद्धेनान्यमनानाभिभाषमाणोऽश्नीयात् न शिशून्निर्भर्त्सयन् नाप्रदाय प्रेक्ष्यमाणे
भ्यः यमः अश्नाति यो भृत्यजनस्य मध्ये मिष्टान्नमेको रसगृध्नबुद्धिः दीनैः कटाक्षैरभिवीक्ष्यमाणो व्यक्तं विषं हालहलं च भुंक्ते देवलः एकव
स्त्रो न भुंजीत कपाटमपिधाय च कपाटमपिधाय द्वारमावृत्य स्वग्रामे ग्रामतो वापि सन्निकृष्टे मृते सति न भुंजीताशनं धीमान् धर्म्यवेशा

कक्कारणान् गोत्नमः नभक्ष्यानुत्संगे भक्षयेत् नवा रात्रौ प्रेष्याहृतं दास्याहृतं दुग्धादि शस्वः नानियुक्तोऽग्रासनं गच्छेत् नअग्रासनस्थः
प्रथममश्नीयात् नाधीकं दद्यात् नप्रतिगृण्हीयात् मनुः नभुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् नातिप्रगे नातिसायं नसायंप्रातराशितः
अतिप्रगे सूर्योदयसन्निधौ अतिसायं महानिशायां नसायमित्यादि प्रातर्भोजनेनैव तृप्तः सायं पुनर्भोजनं न कुर्यादित्यर्थः बृहस्पतिः न
स्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन नपादौ न शिरोबस्तिं नपदा भाजनं स्पृशेत् बस्तिर्नाभेरधोदेशः याज्ञवल्क्यः नभार्यादर्शनेऽश्नीयान्नैक
वासा न संस्थितः भार्यादर्शने भार्यया दृश्यमानः पश्यन्तीति केचित् ब्रह्मपुराणे अप्येकपंक्त्यां नाश्नीयात् संबंधिस्वजनैः सह कोहि जानाति
किं कस्य प्रच्छन्नं पातकं भवेत् भस्मस्तंभजलद्वारमार्गैः पंक्तिं च भेदयेत् कोहि जानातीत्यादिना पातकसंदेहे एकपंक्त्यां न भोक्तव्यमित्युक्तं
निर्दोषत्वे तु निश्चिते भोक्तव्यमेव भस्मस्तंभादिना च पंक्तिभेदाभिधाने पातकिनापि सह एकपंक्त्यां भोजने दोषो नास्तीत्यर्थः महाभारते॰
पानीयं पायसं सर्पिर्मधुयुक्तं मधून्यपि निरस्य शेषमेतेषां न प्रदेयं तु कस्यचित् निरस्य त्यक्त्वानेन यदि देवान् शेषमनुतिष्ठन्ति तदा न देयमि
त्यर्थः निरस्यमिति पाठे तु शेषं न धार्यमित्यर्थः तदाह ब्रह्मपुराणे तिलकल्कं दधिक्षीरं जलं क्षौद्रं घृतानि च न त्यजेदर्धजग्धानि सक्तूंश्चाद्य॰
कदाचन क्षौद्रं मधु अर्धजग्धानि अर्धभुक्तानि विष्णुः न गोब्राह्मणोपरागे चाश्नीयात् न राजव्यसने प्रवासिनश्चाग्निहोत्री पदाग्निहोत्रंहु
तं मन्यते तदाश्नीयात् यदाहुतं मन्यते वैश्वदेवमपि पर्वणि च यदा पर्वहुतं मन्यते उपरागे अत्यंतपीडायां तथा न नग्नो नोत्कटेन च भिन्नास
नगतः उत्कटासनगः तथा नाकाशे आकाशोत्र हिंदोलादिरिति हलायुधनिबंधः तथा न बहूनां प्रेक्ष्यमाणानां नैकस्मिन्बहवस्तथा शून्या॰
लये वह्निगृहे देवागारे कथंचन तथा शयानः प्रौढपादस्तु कृत्वा चैवावसक्थिकाम्॰ तथा पिबेन्नांजलिना नोत्थाय नबहुभावदुष्टमश्नीयात्

भावदुष्टंपत्रमनः प्रसादोनभवति नथानैकोभिष्टंनोद्धृतस्नेहंनदिवाधानानरात्रौतिलसंवर्द्धनकोविदारवटपिप्पलशाणशाकंद
धिसक्तूनिसत्रापिरात्राविसर्थः यमः खट्वारूढोनभुंजीतनचोतानःकदाचनब्रह्मपुराणे यस्तुपाणितलेभुंक्ते यस्तुफूत्कारसंयुतं
प्रसृतांगुलिभिर्यश्चतस्यगोमांसवच्चतत् नाजीर्णेभोजनंकुर्यात् सान्नुनौनिवुभुक्षितः हस्त्यश्वरथयानोष्ट्रप्रसादस्थानभक्षयेत् श्म
शानाभ्यंतरगतोदेवालयगतोपिवा शयनस्थोनभुंजीतपाणिनस्थंनचासने नसंध्ययोस्तुमध्याह्नेनार्द्धरात्रेकदाचन नार्द्रवासानार्द्रशि
रानचायज्ञोपवीतवान्नप्रसारितपादस्तुपादारोपितपाणिमान् नावसक्थिकसंस्थश्चनचपर्यंकमास्थितः नवेष्टितशिराश्चापिनापदी
द्धृतभाजनः नैकवस्त्रो दुष्टमध्येसोपानत्कः सपादुकः नचर्मोपरिसंस्थश्चचर्मवेष्टितपार्श्ववान् अन्नस्यजन्मकालुष्यंदुःपक्तिंचनकु
त्सयेत् ग्रासशेषंचनाश्नीयात्पीतशेषंपिवेन्नतु शाकमूलफलेक्षूणि दंतच्छेदैर्नभक्षयेत् संचयेन्नान्नमन्नेनविक्षिप्तंपात्रसंस्थितं वहू
नांभुंजतांमध्येनचाश्नीयात्त्वरान्वितः वृथानविकिरेदन्नंनोच्छिष्टः कुत्रचिद्व्रजेत् नस्पृशेत्स्वशिरोविप्रः स्वोच्छिष्टेनैवपाणिना प्रसृतां
गुलिभिर्विस्तृतांगुलिभिः यानमुपात्तहस्त्यादिअतिरिक्तंदोलादि अर्द्धरात्रे रात्र्यादावंतेचसार्द्धैकप्रहरंविहायमध्यरात्रेमहानिशाभो
जनेचर्मवेष्टितपार्श्ववान् सन्नाहादिवेष्टितगात्रः जन्मनिंदितंदेशाद्युत्पत्तिः कालुष्यंमलिनत्वंदुःपक्तिंदुष्टपाकंदंतच्छेदैर्दंतैश्छित्वा
छित्वा मुखप्रविष्टेतुदंतव्यापारेनदुष्टः संचयेदित्यादिविस्तृतमोदनादिअपूपादिनानराशीकुर्यात् मार्कंडेयपुराणे उपघाताद्दतेदोषं
नान्नस्योदीरयेद्बुधः उपधातोऽशौचं अंगिराः उपनीतंयदाचान्नंभोजनेसमुपस्थितं आपीतरसमुच्छिष्टंनदद्यान्नैवभोजयेत् उप
नीतमन्यस्मैइतिशेषः शंखलिखितौ नतिष्ठन्नचरवादेन्नचहसन्नजल्पन्नावलोकयन् इतस्ततइतिशेषः देवलः नभुंजीताघृतंनिसं

आ० द० ४०

गृहस्थो भोजनद्वयम् पवित्रमथहृद्यं च सर्पिराहुरघापहं विष्णुः नोच्छिष्टोघृतमादद्यान्नचंद्रार्कनारकान्निरीक्षेतनमूर्द्धानं स्पृशेन्नव्र
ह्मकीर्तयेत् तथानन्निःशेषभुक्स्यात् अन्यत्र दधिमधुसर्पिःपयःसक्तुपयस्तिलोदकेभ्यः बौधायनः सर्वभक्ष्यापूपकंदमूलमांसानि
दंतैर्नावद्येत् भक्ष्यत्वेनैव प्राप्तानां अपूपादीनां पृथगुपादानं दोषाधिक्यार्थम् लघुहारीतः पृथक्पानं पुनर्दानम् सामिषं पयसा निशि
दंतच्छेदनमुष्णं च सप्तसक्तुषु वर्जयेत् आपस्तम्बः सोत्तरच्छादनश्चैव यज्ञोपवीती भुंजीत कृत्स्नग्रासं ग्रसेत्साङ्गुष्ठेन मुखशब्दं कुर्यान्न
पाणिमवधुनुयात् एवं चात्र गृहीतग्रासकृत्स्नग्रसनविधानाद्ग्रासशेषं नचाश्नीयादिति पात्रस्थशेषपरं नपिंडशेषं पात्र्यामुत्सृजेदिति च
बौधायनोक्तं ग्रसितं तु गृहीतस्पर्दैवाच्छेषस्थितौ विष्णुपुराणे आश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् लवणाम्लौ तथा मध्ये कटुतिक्ता
दिकांस्ततः प्राग्द्रवं पुरुषोश्नीयान्मध्ये च कठिनाशनः पुनरंते द्रवाशी तु बलारोग्ये न मुंचति ब्रह्मपुराणे कुर्यात्क्षीरान्नमाहारं न च पश्चात्पिबेद्दधि
जठरं पूरयेदर्द्धमन्नैर्भागं जलेन च वायोः संचरणार्थाय चतुर्थमवशेषयेत् अधिअधिकं दधीति पाठो विरुद्धः शातातपः विद्यमानेन
तत्तुल्यमनुएह प्रजापतिः हस्तं प्रक्षाल्य गंडूषं यः पिबेदविचक्षणः स दैवं च पितॄंश्चैव आत्मानं चैव घातयेत् बौधायनः भुंजानेषु तु वि
प्रेषु यस्तु पात्रं परित्यजेत् भोजने विघ्नकर्तासौ ब्रह्महा स तथोच्यते पात्रत्यागे दिशांतरगमनात् न त्वेतद्द्व्लाङ्गोजनकाले पात्रधारणाक्षे
पः अथवा नापजहीत्तापजहीत वेत्यापस्तंबेन पात्रधारणयोर्विकल्पविधानात् यदा पात्रधारणपूर्वकं भोजनमारब्धं तदेव बोद्धव्यम्
वृद्धशातातपः दधिक्षीरघृतैर्भुक्त्वा प्रभूतैर्व्यंजनैस्तथा उष्णोदकैर्धान्यचूर्णैः करीश्म श्रूणि शोधयेत् देवलः भुक्त्वाचामेद्यथोक्ते
न विधानेन समाहितः शोधयेन्मुखहस्तौ च मृद्भिः संघर्षणैरपि आचमनमुखादिशोधनयोरर्थात् पाठक्रमबाधः बौधायनस्मरणेः

नातिसुहितोऽमृतापिधानमसीत्युपरिष्टादपः पीत्वा आचांतः पुनराचम्य दक्षिणपादांगुष्टे पाणिभिः श्रावयेत् अंगुष्टमात्रः पुरुषो
ह्यंगुष्टं च समाश्रितः ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति सुहितः तृप्तः हस्तद्वयेनावनेजनं ब्रह्मपुराणे० तथा मांसमत्स्यति
लमधूसंसृष्टं प्राश्य पाप उपस्पृश्याग्निमभिस्पृशेत् ब्रह्मपु० संमार्ज्य बाहू जानू च गोप्रदानफलं लभेत् भुक्त्वा चैव प्रतिष्ठेत न चाप्यार्द्रेण पाणि
ना आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् उद्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही दक्षः भुक्त्वा च सुखमास्थाय तदन्नं परिणा
मयेत् इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् अष्टमे लोकयात्रा च बहिः संध्या ततः पुनः याज्ञवल्क्यः उपास्य पश्चिमां संध्यां हुत्वा
ग्नींस्तानुपास्य च भृत्यैः परिवृतो भुक्त्वा नातितृप्तोथ संविशेत् दक्षः प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् यामद्वये शयानस्त्वब्रह्मभू
याय कल्पते ध्रुवं प्रक्रान्तस्त्वब्रह्मपु० यदह्ना कुरुते पापं दृष्ट्वा तं निशि मुच्यते यावत्स्वग्रहताराश्च शिशुमाराश्रितादिवि तावत्स्वेवनु वर्षाणि जीव
त्यभ्यधिकानि तु अभ्यधिकानि शतात् अथ शयनविधिः तत्र विष्णुपु० कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही गच्छेदस्फुटितां शय्या
मपि दारुमयीं नृपः नाविशालां न वा भग्नां नासमां मलिनां न च न च जंतुमयीं शय्यां त्वधितिष्ठेदनास्तृताम् प्राच्यां दिशि शिरः शस्तं याम्या
यामथ मवा नृप सदैव स्वपतः पुंसो विपरीतं तु रोगदम् नंदीपुरा० नमो नंदीश्वरायेति यः प्रोक्त्वा सुप्यते नरः तस्य कूष्माण्डराजेभ्यो न भविष्य
ति वै भयम् अत्र हारीतः नाश्मपीठोपधानेन तिर्यगुदक्प्रत्यक्छिराः न नग्नो नाशुचिर्न चासनेनोच्छिष्टो न प्रेंगे प्रेंगे प्रातःकाले अत्र शंख
लिखितौ न विशीर्णायां खट्वायां नान्यवर्णोपसेवितायामनभ्युक्ष्य न भूतयक्षग्रहायतनेषु न श्मशानवल्मीकमहावृक्षच्छायासु न पर्वन भस्सु
तसेवा पर्वा त्र प्रतिपत्पञ्चदश्योः संधिः उशनाः तैलेनाभ्यक्तशिराः स्वपेत् पैठीनसिः नादीक्षितः कृष्णचर्मणि सुप्यात् विष्णुः नार्द्रपादः सु

आ०
हृ०
४१

प्यात् नोनरुणपराशिराः ननग्नोनानुवंशंनाकाशेनपालाशेशयनेनपंचदारुकृते नगजभग्नकृतेन भिन्ने नाग्निप्लुष्टेनघटसिक्तेद्रुमजेन
श्मशानेन शून्यालयेनदेवतायतनेषुनचजलमध्येनधान्यगोगुरु हुताशनसुराणामुपरिनोच्छिष्टोनदिवास्वपेत् नसंध्यायांनभस्मनिंदे
शेचनासुचौनार्हितःपर्वतमस्तके अनुवंशंगृहमूर्द्धन्यकृतेकाष्टेदेष्मीनुगतः अथदारोपगमः तत्रापस्तंबः सदानिशायांदाराच् प्रत्य
ऽलंकुर्वीत विष्णुपु० स्नातःसुगंधिधृक्प्रीतोनाध्यातः क्षुधितोपिवा सकामः सानुरागश्च अवायंपुरुषोव्रजेत् अवायोमैथुनं बृहस्पतिः
ऋतुकालाभिगमनंकुर्यात्पर्वाणिवर्जयेत् स्त्रियाःशुक्रेधिकेस्त्री स्यात्पुमान्पुंसोधिकेभवेत् तस्माच्छुक्रविवृद्ध्यर्थंच्छ्यस्निग्धंचभक्षये
त् लेह्याहारंस्त्रियंकुर्यादेवंसंजनयेत्सुतं ऋतुकालाभिगमनंपुंसाकार्यंप्रयत्नतः सदैववापर्ववर्ज्जंस्त्रीणामभिमतंहितत् पराशरः ऋतु
स्नातांतुयोभार्यांसन्निधौनोपगच्छति सगच्छेन्नरकंघोरंब्रह्महेतितथोच्यते यमः ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायां
ब्रह्महत्यायांयुज्यतेनात्रसंशयः भार्यामृतुमुखेयस्तुसन्निधौनोपगच्छति पितरस्तस्यतंमासंतस्मिन्रेतसिशेरते देवलः यस्तुदारानृ
तुस्नातांस्वस्थः सन्नोपसर्प्पति भ्रूणहत्यामवाप्नोतिगर्भंप्राप्यविनास्यसः स्वस्थोरोगादिरहितः बौधायनः त्रीणिवर्षाण्यृतुमतींयोभार्यां
नोपगच्छति सतुल्यंब्रह्महत्यायादोषमृच्छत्यसंशयम् ऋतौनोपैतियोभार्यामनृतौयश्चगच्छति तुल्यमाहुस्तयोर्दोषमयोनौयश्चसिंच
ति अथमनुः नोपगच्छेत्प्रमत्तोपिस्त्रीयमार्त्तवदर्शने समानशयनेचैवनशयीततयासह रजसाभिप्लुतांनारींनरस्याभ्युपगच्छतः प्रज्ञा
यशोबलंवीर्य्यंविनाशमुपगच्छति नानास्मृतिसंवादादृतुकालगमनेउभयनियमः ऋतौगच्छेदेवऋतावेवगच्छेदितिच सदैवेतिअनृ
तावपीत्यर्थः पर्ववर्जमितिपर्वपदंनिषिद्धकालोपलक्षणं स्त्रीणामभिमतंहितदितिहेतुनिर्देशात् स्त्रियाःसकामत्वेनरक्षणार्थमनृतावपि

गमनंनोचेद्दृत्नावेवेतिव्यवस्थितविकल्पः याज्ञवल्क्यः स्वस्थइन्द्रौसत्कांतुत्रंलक्षण्यंपजनयेत्पुमान् तथा षोडशर्त्तुनिशाः स्त्रीणां तत्रमनुः
तासामाद्याश्चतस्रस्तुनिंदितैकादशीचया त्रयोदशीचशेषास्तुप्रशस्तादशरात्रयः युग्मासुपुत्राजायंतेस्त्रियोऽयुग्मासुरात्रिषु आपस्तम्बः
स्त्रीवाससैवसन्निपातःस्यात्तयावत्सन्निपातंचैवसह शय्यांभित्वाततोनानाउदकोपस्पर्शनमपिवालेपान् प्रक्षाल्याचम्यप्रोक्षणमंगा·
नाम् स्त्रीवासः स्त्रीसंभोगार्थवासः सन्निपातोऽभिगमः नानाभिन्नाशय्येत्यन्वयः उदकोपस्पर्शनंस्नानं एतच्चऋत्नुगमनेनोचेद्यदिपक्षा
न्तरमनृतौ तथाचवृद्धशातातपः ऋतौतुगर्भशंकित्वात्स्नानंमैथुनितः स्मृतं अनृतौतुसदाकार्यं शौचंमूत्रपुरीषवदिति गौतमः नमैथु
नीभूयशौचंप्रतिविलंबेत् शौचमंत्रलेपप्रक्षालनाचमनमात्रं ऋतुगमनेचस्नानंतुपूर्वोक्तक्रमंधिकाएपादकंनतु चांडालादिस्पर्शवद्गतु
गमनेनाप्रायत्यंजन्यते तच्चस्नानेनापनीयते येनएत्रावपिस्नानंस्यात् अतः स्नानंप्रातरेवेतिवृद्धाः वृद्धशातातपः द्वावेतावशुचीस्यातांद
म्पतीशयनंगतौ शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान् शुचिःस्नानंप्रोक्षणेविनापि नतुलेपप्रक्षालनाचमनयोर्निवृत्तिरित्याहुः वि
ष्णुपु० नस्नातांतुस्त्रियंगच्छेन्नातुरांनरजस्वलां नानिष्टांचप्रकुपितांनाप्रशस्तांनगुर्विणीं नादक्षिणांनान्यकामांनाकामांनान्ययोषितंक्षु
त्क्षामामतिभुक्तांचस्वयंचैभिर्गुणैर्युतः नान्ययोनावयोनौवानोपभुक्तौषधीस्तथा देवद्विजगुरूणांचव्यवायीनाश्रमेभवेत् चैत्यचत्व
रतीर्थेषुनैवनैवचतुष्पथे नैवश्मशानोपवनोसलिलेषुमहीपते प्रोक्तपर्वस्वशेषेषुनैवभूपालसंध्ययोः गच्छेद्व्यवायंमतिमान्नमूत्रो
च्चारपीडितः प्रोक्तपर्वसुचतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा पर्वाण्येतानिराजेन्द्ररविसंक्रांतिरेवच इतिश्लोकोक्तेषु वामनपुराणे
बुधेचयोषांनसमाचरेत् तथा पूर्णासुपोषित्यारिवर्जनीया तथायोषिन्मघाधृत्तिकोत्तरासु अत्रयाज्ञवल्क्यः मघांपौष्णांचवर्जयेत् वसिष्ठः

मलिनवाससासहनसंवसेत् नरजस्वलायानायोग्पयासंवासोऽत्रमैथुनम् अयोग्या अप्राप्तयौवना विष्णुः नश्राद्धंदत्वान्नंभुक्त्वाना मंत्रितः श्राद्धेनव्रतीनदीक्षितोनदेवतायतनश्मशानशून्यालयेषुनवृक्षमूलेनदिवानसंध्ययोः नमलिनाङ्गानाभ्यक्तःनरोगार्त्तोनरो गार्तः नहीनाङ्गीनाधिकाङ्गीतथैवच वयोधिकांनोपयाद्गर्भिणींनारींदीर्घमायुर्जिजीविषुः वशिष्ठः अपिचकाठकेप्रवचनेविज्ञायते अद्यश्वोविजनिष्यमाणाःपतिभिःसहशयीरन् इतिस्त्रीणामिंद्रदत्तोवरः समूलवचनोभोगोमीमांसान्यायनिर्म्मलः श्रीदत्तेनसत्ता मेषआचारदर्पणःकृतः दुरुक्तमपिसत्कर्मेमन्वादिवचनाश्रितम् अपिचर्मोदकंतीर्थसलिलांतर्गतं शुचिः ॥इतीश्रीइन्दुपाध्या यश्रीदत्तकृतआचारादर्शःसमाप्तोयं॥ ॥अथआचारादर्शस्यसूचीपत्रम्प्रारभ्यते ॥ ॥सं०१९३९पौ०कृ०९भौमे भैरवपाठक्

मंगलाचरणं	प०	पृ०	पं०	अथशौचम्०॥	प०	पृ०	पं०	आचमनप्रमाणम्०	प०	पृ०	पं०	आचमनापवादम्	प०	पृ०	पं०
प्रातर्विष्णुस्मरणं	१	२	१	मृत्तिकास्थानानि०	३	१	१	शिरोवेष्टनादिकथनं	४	१	७	अथदंतधावनम्	६	२	१
मूत्रपुरीषोत्सर्गविधीः	१	२	२	मृत्तिकाप्रमाणः०	३	१	४	नखाग्रेणाचमननिषेधः	४	२	१२	दंतधावनमंत्रम्	७	१	९
तत्रदिक्क्रमः	१	२	५	दिनादिशौचमृत्तिप्र०	३	१	१०	अग्न्युदकशेषेणाचमननिषे०	५	१	७	दंतधावनकाष्ठप्रमाणः	७	१	१३
मूत्रपुरीषेनिषेधस्थानं	१	२	६	शौचस्थानेजलशुद्धिः	३	२	८	वर्षधारासुनाचामेत्०	५	१	९	दंतधावनेप्रशस्तवृक्षाः	७	२	२
मूत्रपुरीषेअर्काभिमुखेनिषेधः	२	२	६	मूत्रमात्रोत्सर्गेदक्षः	३	२	८	आचमननिमित्तानि०	५	१	९	दंतधावनेनिषिद्धवृक्षः	७	२	८
लोष्ठादिमृदनिषेधः	२	२	१०	शौचानंतरंकर्मः	३	२	९	द्विराचमननिमित्तानि	५	१	१३	दंतधावनेनिषेधम्	८	१	४
	२	२	१२	अथाचमनविधम्	३	२	१२	आचमनानुकल्पविधिः	६	१	४	दंतधावनेकाष्ठालाभेविशे०	८	१	७
					४	१	२		६	१	११		८	१	१०

आ० द०सू० ४३

एमः ४३

सू०
आ०द०

४४

रामः
४४

॥ इति आचारादर्शः समाप्तिमगात् ॥ शुभः ॥

[OrderDescription]
,CREATED=04.12.19 15:00
,TRANSFERRED=2019/12/04 at 15:17:33
,PAGES=89
,TYPE=STD
,NAME=S0002297
,Book Name=M-609-AACHARADARSH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,